Chapter-5

# ☆पञ्चमपरिच्छेदः.............(समीक्षात्मकोऽध्ययनम्)☆

पृष्ठानि


**(५) पञ्चमपरिच्छेदः .....( समीक्षात्मकोऽध्ययनम्)................................२९१ तः ३४७**

अ. (१) वैदिकसाहित्यस्य पर्यावरणम् ।...........................................................२९१ तः ३०९

(२) पौराणिकसाहित्यस्य पर्यावरणम् ।...........................................................३१० तः ३२३

(३) उपनिषद्ग्रन्थेषु पर्यावरणम् ।...........................................................३२४ तः ३३०

ब. (१) महाकविनां पर्यावरणविषये योगदानम् ।...........................................................३३१ तः ३३६

(२) कालिदासस्य पर्यावरण समीक्षा ।...........................................................३३७ तः ३४४

(३) मानवजीवनेऽस्य प्रभावः ।...........................................................३४५ तः ३४७

**उपसंहारः...........................................................................................३४८ तः ३५१**

# पञ्चमपरिच्छेदः (समीक्षात्मकोऽध्ययनम्)

## (अ) १. वैदिकसाहित्यस्य पर्यावरणम्।

'वैदिकसाहित्यस्य पर्यावरणम्' इति विषये वर्णनप्रसङ्गे प्रथमं 'वेद' शब्दस्य ज्ञानमावश्यकम्। तज्जिज्ञासायामुच्यते–विद् ज्ञाने धातुतः लभ्यमानोऽर्थः यो वेदयति अर्थात् इहलौकिक पारलौकिकयोःज्ञानं कारयति वेदः। विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मादिपुरुषार्थाः इति वेदाः। वेदो हि अशेषविश्वविज्ञानपरिज्ञानप्रदं शास्वतिकमपौरुषेयं शास्त्रम्। चत्वारो वेदेषु जीवननिर्वहणार्थं यावज्ज्ञानमावश्यकं तावत् भगवता परमेश्वरेण वेदद्वारा जनेभ्योदत्तमस्ति।

अद्यत्वे एषा पृथिवी पर्यावरणप्रदूषणात् क्लेशायमानाऽस्ति, तत् प्रदूषणनिवारणाय पर्यावरणसंरक्षोपायस्यज्ञानमावश्यकमतः पर्यावरणसंरक्षणसंवर्द्धनविषये यत् वेदेषु दीर्घचिन्तनमस्ति, तदत्र मया प्रस्तूयते।

पर्यावरणशब्दस्य व्युत्पत्तिः परि + आ + वृ + ल्यूट् प्रत्ययाद् जातोऽस्ति। यस्य अर्थो भवति तत् वातावरणंयत् मनुष्यस्य परितः व्याप्तं भूत्वा तेन प्रत्यक्षोऽप्रत्यक्षरुपेण वा सम्बद्धोऽस्ति। प्रकृत्याः उपादान रुपेण यथा जलम्, वायुः, मृत्, पादपः, तथा विभिन्न प्राणिनः स्वयं मनुष्योऽपि पर्यावरणस्य एकांशो वर्तते।

डॉ. रघुवंशी स्व ग्रन्थें कथयति **"पारिभाषिक रुपे पर्यावरणं शब्दः जीवानामनुक्रियान् प्रभ्तविताकर्तु समस्तभौतिकजीनीय परिस्थितीनां योगो वर्तते।"**[१]

मनुष्य यदा अस्मिन् भूतले अवतीर्णो जातः तस्मात् समयतः एव मनुष्यस्य पर्यावरणेन सह अविभाज्य सम्बन्धोऽस्ति। पर्यावरणानां विभिन्न तत्वानि मनुष्यश्च अन्योन्याश्रितो भूत्वा पृथिव्यां पर्यावरणसन्तुलनं सम्यक् कृतमस्ति। एषप्रकृत्यारनुशासनमस्ति, अस्यानुशासने काचिदपि अवाञ्छनीयं परिवर्तनमेव पर्यावरणसन्तुलेन विकृतिमानयति। येन सम्पूर्णविश्वाय हानिकारको भवितुं शक्नोति।

वर्तमान काले औद्योगिकिकरणम्, अरण्यानामुच्छेदनम्, वन्यजीवानांहननम्, परमाणुः परिक्षणादिकारणाद्, असन्तुलनं वृद्धिं प्राप्तवानस्ति। पर्यावरणस्य अवाञ्छनीयं परिवर्तमेव प्रदूषणं कथ्यते। वृद्धिं गच्छन् प्रदूषणकारणतः अद्य मनुष्यस्य अस्तित्वमेव विनाशस्य भय

---

१. पर्यावरण और प्रदुषण

स्थाने पतितोऽस्ति। अधुना प्रदूषणं दूरीकृत्य पर्यावरणस्य संरक्षणमतीवाश्यकमिति अनुभूयते। मानवः स्वजीवनस्य संरक्षणार्थं प्राकृतिकसंतुलं सम्यक कर्तुं प्रयत्नशीलोऽस्ति। प्रवर्धमानौद्योगिक विकासः वैज्ञानिकोन्नत्यै सह प्राचीन ऋषि परम्परायाः समन्वयस्य नितान्तावश्यकताऽस्ति। अस्माकं प्राचीनाः ऋषिमनीषेयः तथा साहित्यकाराणां ध्यान सदा पर्यावरणोपरि केन्द्रित मासीत्। वैदिकसाहित्यं यदि वयं पर्यावरणसाहित्यं कथयामः तर्ह्यपि नास्त्यत्युक्तिः। सम्पूर्णसंस्कृतसाहित्यः निवीडारण्यं प्रचुरवन्यप्राणिपरिशुद्ध जलस्रोतांसि,

पञ्चभूतादि समस्त प्राकृतिकोपादानानां वर्णनात् परिपूर्णोऽस्ति। तदानिन्तनकाले उपासना माध्यमेन पर्यावरणस्य संरक्षणमप्रत्यक्षरुपेण विद्यमानमासीत्। दार्शनिककारणतोऽद्यत्वे इव स्पष्टं नोक्त्वा सूक्ष्मसांकेतिकभाषया सर्वमुक्तमस्ति।

अथर्ववेदे आयुर्वेदसिद्धान्तस्य महनीय जिज्ञास्य तथ्याः निहिताः सन्ति । आयुर्वेददृष्टिकोणतः यदि वयं पश्यामः तर्हि अथर्ववेदः एक5 नितान्त वैज्ञानिकशास्त्रोऽस्ति। भौतिकविज्ञानस्यानेकतथ्याः अत्र विकीर्णाः सन्ति, तान् ज्ञातुं मूल्यांकनं कर्तुं च वेदज्ञानेन सह विज्ञानवेत्ता भवितुमावश्यकमस्ति।

वैदिकसाहित्यानुसारेण सर्वे मानवारनुभवेयुः यत् तेषां शारीरिक–मानसिकसंरचनायां प्रकृतीनां गुणाः सम्मिलिताः सन्ति। अतः प्रकृत्याः संरक्षणैव तेषां मानवानां सुरक्षा निहितोऽस्ति।पर्यावरणस्य संरक्षणार्थऋषयः स्व सर्वस्वार्पणार्थ सज्जाः तिष्ठन्ति स्म। अस्य तथ्यस्य प्रमाणमथर्ववेदे द्रष्टव्योऽस्ति। यथा–

**सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथिवी शरीरम्।**

**अस्तृतो नामाहमयमस्मि स आत्मानंजनदघेद्यावापृथिवीभ्यांगोपीथाय।।** [१]

अर्थात् –मम नेत्रो सूर्यरिवप्रकाशमानौ, प्राणः वायुरिवगतिशीतः आत्माऽन्तरिक्षरिवमध्यवर्ती तथा शरीरं पृथिव्यारिव सहनशीलोऽस्ति। एतादृशोऽहमावरणं विना प्रसिद्धाऽस्मि, सर्वे जानन्ति। अहं स्वाऽत्मा सूर्यः पृथिव्याश्च रक्षणार्थमर्पयामि। सूर्यः पृथिवी तथा सर्वेदेवाः रथावरजङ्गमानां रक्षकाः वर्तन्ते। कारणञ्च पर्यावरणसंरक्षणैव प्राणीनां रक्षाऽस्ति। यथा–

**त्रायन्तामिमं देवास्त्रायन्तां गणाः। त्रायन्तां विश्वभूतानि यथा यपरपा असत्।।** [२]

---

१. अथर्ववेद –५/९/७, २. – १/१३/४,

अर्थात् इन्द्रियाणि प्राणिमात्रान् रक्षेयुः, वायुप्रवाहान् पृथ्व्यप्तेजोवाय्वाकासान् रक्षेयुः, येन प्राणिनः दोषमुक्तो भूत्वा स्वस्थरुपेण जीवनयापनं कुर्युः।

संभवतः अस्माकं पूर्वजाऋषयः जाननति स्म यत् प्रकृत्याः क्रोडैव स्वस्थजीवनस्यकल्पना कर्तुंशक्यते। अस्मात्कारणात् ग्राम्य अशान्तवातावरणात् दूरं प्रकृतिक्रोडे सात्विकवातावरणे सर्वभूतहिते रताः ऋषयः लोककल्याणार्थं चिन्तनशीलाः अतिष्ठन्। तेन वैदिकसाहित्यस्य प्रत्येकमन्त्रे बारं–बारं पर्यावरणमुक्तम् अस्ति, यत् प्राणिमात्राणामिच्छा पूर्त्यर्थं सदैव सज्जाः भवेयुरिति। यथा– ऋग्वेदस्य– ऋषि काण्व मातरिश्वा कथयति–

**पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः।**

**ओपो वातः पर्वतासो वनस्पतिः श्रृणोतु पृथिवी हवम्।।ऋग्.८/५४/४।।**

अर्थात् सर्वपूषन् सूर्यः सर्वव्याप्तवायुः, वाणी, सप्तस्थानस्य जलं च ममाऽह्वानं श्रृणवन्तु। एवं प्रकारेण वायुः, मेघः, वृक्षलताभूमिश्चाऽपि ममोऽह्वानं श्रृणवन्तु।

प्राकृतिकदेवतामाह्वानं कृत्वा तेषा स्तुति करणम्ए तान् आनुकूलयितुं ऋषीणांनिवेदनं दृष्ट्वा तेषां प्राकृतिक संरक्षण विषये जागरूकता दृश्यते। यजुर्वेदे शान्तिपूर्वकंए कार्यसम्पादनार्थं अथर्वऋषिः देवान् निवेदयति। यथा–

**शन्नो वातः पवतां शन्नस्तपतु सूर्यः।**

**शन्नः कनिक्रदेवः पर्जन्यो अभिवर्षतुः।।** [१]

अर्थात्– पवनोऽस्माकं कृते सुखेन वहतु, सुखकारी सूर्योऽधिकं मा तपतु, शब्दवान् अग्निदेवः कल्याणकारी भवतु, मेघः परितः वर्षतु।

पर्यावरण संरक्षणे वैदिकधारायामुक्तमस्ति यत् प्रकृतिः नियमानुसारेण स्व कार्यं करोति, अतः मानवोऽपि प्रकृत्यारनुशासने कर्मं कुर्वन् सुसम्पन्नो भवेत्, एवं कृते सति प्रकृतिः सुरक्षितः भवति, तथा च प्रकृत्यानुसारेण क्रियमाणं कार्यं कल्याणं शान्ति च प्रदानं कुरुतः। यथा–

**देवस्य सवितुः सर्वे कर्म कृण्वन्तु मानुषाः। शं नो भवन्त्वप ओषधीः शिवाः।।** [२]

१. यजुर्वेद – ३६/१०, २. अथर्ववेद – ६/३/३,

अर्थात्– सर्वे मानवाः सवितुः प्रकाशे स्वकर्म कुर्वन्तु, तथा अन्नौषध्यादि पदार्थानि अस्मान् सुखेन लभ्येरन्। अत्र सवितुर्प्रकाशस्य तात्पर्यमिदमस्ति यत् सर्वे पर्यावरणस्य नैसर्गिकचक्राऽनुकूलो भूय कार्य कुर्वन्त्वीति। एवं प्रकारेण वैदिकसाहित्ये पर्यावरणसंरक्षणार्थं शुद्ध्यर्थं च प्रकृत्या सह विवेकपूर्णव्यवहाराः संवेदनशीलताया संरक्षणपरिक्षेत्रे ऋषयोऽस्मान् उपदिशन्ति। पर्यावरणस्य यानि मुख्यांग भूतानि पञ्चतत्त्वानि सन्ति तेषामपि चिन्तन वैदिकसाहित्ये अस्ति।

## (१) भूमि संरक्षणम्।

पृथिवी क्षमाशीलाऽस्ति। यत्राऽनेक जीवानां पोषणं संरक्षणञ्च क्रियेते। ऋषयः पृथिव्याः संरक्षणस्योत्तरदायित्वं स्वीकुर्वन् सन् अस्मान् प्रेरयन्ति। मानव अस्या भूम्याः संरक्षणार्थं स्वात्मबलिदानार्थं च सज्जो भव। अथर्ववेदस्य पृथिवीसूक्तान्तर्गतोऽयंमन्त्रोऽस्मान् सन्देशति। यथा–" **वयं तुभ्यं बलिहृवतः श्याम।।" अथर्व. पृ. सू.–६२।।**

वेदानुसारेणेयं धरा केवलं मनुष्याणां कृते नाऽपितु द्विपदचतुष्पदजीवानां कृतेऽप्यस्ति। अथर्ववेदे अथर्वऋषेरनुसारेण। यथा– **त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं विभर्षि द्विपदस्त्वंचतुष्पदः तवेमे पृथिवी पञ्चमानवा येभ्यो ज्योतिरमृतं मर्तेभ्यः उद्यन्सूर्यो रश्मिभिरा तनोति।। अथर्व– १२/१/१५ ।।**

हे पृथिवि त्वदुत्पन्नो मनुष्यः तवोऽपरि विचरति, त्वं द्विपदचतुष्पदानामाश्रयताऽस्ति। पञ्चतत्त्वानित्वदीया सन्ति, सर्वभूतहित्यर्थमुदित सूर्यः स्वाऽमृतमयप्रकाशपूर्णकिरणान्परित विकिरति।

अथर्ववेदस्य सम्पूर्णः पृथिवी सूक्तः पृथिव्या सह मानवीय सम्बन्धः, पृथिव्याः प्रति आत्मीयता, संवेदना, समृद्धिः, कर्तव्यरक्षादि सन्देशैः परिपूर्णोऽस्ति। निःस्वार्थरूपेण पृथिव्याः सुरक्षा संवेदनायारनुपममुदाहरणं वैदिक साहित्येऽव प्राप्यते। यथा–

**यत्ते भूमि विखनामि क्षिप्रं तदपि राहतु। माते मर्म विमृग्वरि मा ते हृदयमर्पिपम्।।**[१]

हे भूमि तव यद्भागं खनामि तद् पुनः शीघ्रं रोहतु अहं तव मर्मस्थले न ताडेयम्, तव हृदये क्षतिः न प्राप्नुयाम्। पृथिव्यस्मान् रक्षति, अतः तस्याः संरक्षणमस्माकं कर्तव्योऽस्तिं। अस्माभिः वैदिकनिर्देशाऽनुकरणं कर्तव्यम्। प्रकृत्यारूपकारान् भूयोभूय स्मृत्य

---

१- अथर्ववेद – १२/१/३३,

तस्याऽभारप्रकटनं पृथिवीरक्षायाः प्रथमसोपानोऽस्ति। अथर्ववेदाऽनुसारेण पर्यावरणेन सहाऽनुकूल भावना पर्यावरणस्य विविध रूपाम् रक्षति। यथा–

**यावत् तेऽभि विपश्यामि भूमे सूर्येण मेदिना।**

**तावन्मे चक्षुमां मेष्टोत्तरामुत्तरां समाम्।।अथर्व.–१२/१/३३।।**

अर्थात्– हे भूमि यावत् प्रियतमसूर्येण सह तव विविधस्वरूपाणां दर्शनं कुर्याम्, तावत् मम दृष्टिः, उत्तमोत्तमाऽनुकूल क्रियान् नष्टं न कुर्यात्।

भारते प्रारम्भतरेव प्राकृतिकवैविध्यकारणात् भौगोलिक–सामाजिकसांस्कृतिकश्च मनोहारिता परितो दृश्यते। पृथिवी स्व विविधरूपे दृष्टिगोचरा भवति, अस्याकर्षणं केवलं मानवान् नैव, देवानपि अस्ति। धन्येयं भारतभूमिः, अस्यासुरक्षाऽस्माकं सुरक्षाऽस्ति। अथर्ववेदे–अथर्वाऋषिः यथा–

**विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।**

**वैश्वानरं बिभ्रती भूमिरग्निमिन्द्र ऋषभा द्रविणे नो दधातु।।अथर्व.१२/१/६।।**

सर्वेषां भरणपोषणकर्तृ, सम्तत्तेः रक्षयित्री, आधारदातृ, हिरण्यवक्षा, चलायमाना, सुखदात्री, सर्वेषां हितकारी, अग्नीं बिभ्रती, इन्द्रं प्रधानमन्यमानैषाभूमिः धनबलमध्येऽस्मान् रक्षेत्। ये प्रकृतिप्रेमी पर्यावरणविद् वा भवन्ति, ते पृथिव्याः महत्वं जानन्ति। पृथिव्या सह अभद्रव्यवहारो नैव कुर्वन्ति, तस्य दुष्परिणामोऽवश्यप्राप्तो भवति। अथर्ववेदानुसारेण यथा–

**अश्व इव रजो दुधुवे वितान जनान् य आक्षियन् पृथिवी यादजायत्।**

**मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम्।। अथर्व.१२/१/५७।।**

यावदजायत् एषा पृथिवी, यथाश्व रजो दुधुवे तथैव हर्षदायिनी, अग्रगामिनी, संसारस्य रक्षकारिणी, वनस्पती औषधीनाञ्चग्रहणस्थलीन् तान् मनुष्यान् दुधुवे, ये पुथिवीं कलुषितं कुर्वन्ति।

## (२) वेदेषु वायुसंरक्षणम्।

इह जगति विद्यमानानां जीवधारीणां जीवनार्थं पर्यावरणतः प्राप्त प्राणवायोरावश्यकता भवति। एतद् वैज्ञानिकं तथ्यमस्ति यत् मनुष्यः प्रतिदिनं २२००० बारं

श्वासो गृह्णाति तदा सः। ६ किलो परिमितवायुः व्ययोभवति। पृथिवीतले विद्यमानान् प्रत्येकजीवान् जीवितुं शुद्धवायोरावश्यकता भवति। तस्य दायित्वं मानवस्य वर्तते। परन्तु अद्यत्वे स्वार्थसाधने रता मानवाः गङ्गानदीनां महानदीनां च जलानि प्रदूषयन्ति, अरण्यानि छिन्दन्ति वन्यजीवान् धातयन्ति। सम्प्रति वायुमण्डले वास्पस्य मात्रा प्रतिदिनमुत्तरोत्तरं वृद्धिं गच्छति। पृथिव्याः उर्वरा शक्तिरपि अनुदिनं अपचीयते। प्रकृतेः मनोहराणि दृश्यानि विकृतमाप्नुवन्ति, महानगरेषुतैलजेन धूमेन तु प्राणीनां श्वसनमपि कठिनं जातं परं मानवाः पर्यावरणस्य संरक्षणार्थं न अद्यापि विचारयन्ति। वेदः सडिण्डिम घोषं वदति। यथा–

**वात आ वातु भेषजं शंभु मयोभु नो हृदे।**

**प्रण आयूंषि तारिषत्।।**[1]

**यददो वात ते गृहेऽमृतस्य निधिर्हितः।**

**द्वाविमौ वातौ वात आ सिन्धोरा परावतः।**

**दक्षं ते अन्य आ वातु परान्यो वातु यद् रपः।।**[2]

एतैः मन्त्रैः एतद विदितं भवति यत् वायुः अस्मभ्यं सुखं शान्तिं च यच्छतु।

यो कोऽपि वायुः प्रदूषितं करोति, हानिं प्रापयति सोऽपराधि–अस्ति। वायुः सुप्रयोगत् आनन्दं ददाति, कुप्रयोगात् दुःखम्। वेदः पवनदेवं कथयति यत् वायुप्रदूषणकारकतत्त्वान् नाशयेत्– यथा–

**वायो यत्ते तपस्तेन तं प्रतितप।**

**योऽस्मान् देष्टि यं वयं दिष्मः।।**[3]

अर्थात्– हे पवन् य तव प्रतापोऽस्ति तेन तान् अनिष्टकारकतत्वान् नाशय, ये अष्माभिरप्रियं कारयन्ति। अथर्ववेदस्य अथर्वऋषिमतेन वायुः सर्वश्रेष्ठशोधकतत्वोऽस्ति। तस्य क्षतिः अस्मान् क्षतिं कारयितुं समर्थोऽस्ति। यथा–

**वायो यत्ते शोचिस्तेन तं प्रति शोचयो अस्मान्।द्वेष्टि यं वायं द्विष्मः।।अथर्व.२/२०/४।।**

१. ऋग्वेद – १०/१८६/१, २. – १०/१३७/३, ३. अथर्ववेद – २/२०/१

हे पवनदेव यत् ते तेजोऽस्ति तेन तान् दोषान् निवारय ये अस्माकं प्रियं कुर्वन्ति। वेदेषु पञ्चवायुनां वर्णनं प्राप्यते। प्राणः, अपानः, व्यानः, समानः, उदानश्च। एतेषु प्राणाऽपानौ द्वावधिकमहत्वं धारयतः। वायो· शुद्धयर्थ सुगन्धितहवनीयद्रव्यैः यज्ञः कर्तव्यः येन वायोः शुद्धस्वरुपस्य रक्षा स्यात्। कारणञ्च अग्नौ प्रदत्ता घृतस्य सामग्र्याश्च आहुतयः वायुमण्डलं शुद्धं पूतं पुष्टिकरं च कुर्वन्ति। यदा च घृतसामग्रीमिश्रिता आहुतयः वेदमन्त्रोच्चारणपुरस्सरं यज्ञकुण्डे प्रदीयन्ते तदुत्थितो धूमः वायुमाकाशं पृथिवीं जलं च शोधयति,सकलं च वातावरणं सुगन्धितं एवमेव च स्वास्थ्यप्रदं विदधाति। अतो यजुर्वेदे ऋषिभिः आदिष्टम्– **"घृतेन द्यावापृथिवी पूर्णेथाम्।।"**[1]

इदं स्वतः सिद्धमेव यत् घृतेन द्यावापृथिवीपूरणस्य उपायः यज्ञः एव। सामवेदे हविषा वायुमण्डलशुद्धयर्थं प्रेरणा इत्थं प्रदत्ता–

**" आ जुहोता हविषामर्जयध्वम्।।"**[2]

न केवलं भौतिकदृष्ट्या परन्तु अध्यात्मिकदृष्ट्यापि यज्ञस्य महत्ता स्वतः सिद्धा। सज्ञः त्यागमुपदिशति त्यागमयं च जीवनं समाजस्य कृते महदुन्नतिकरं सुखशातिवर्धकं चेति नात्र सन्देहः।

## (३) जलसंरक्षणम्।

येनकेनापि रुपेण यत्र जीवनं प्राप्यते सैव जैवमण्डलं कथ्यते। जैवमण्डलं त्रयविभागे विभक्तोऽस्ति। यथा– वायुमण्डलम्, स्थलमण्डलम्, जलमण्डलं च। अधुना अवशरप्रपतोऽहं जलमण्डस्य वर्णनं करोमि। जलस्य द्वौ भौ स्तः। अलवणीयजलपर्यावरणम्, समुद्रीयजलपर्यावरणञ्च आगच्छतः। स्थिरजलान्तर्गते कूपतडागादि आगच्छन्ति। प्रवाहितजले निर्झराः नद्यश्च आगच्छन्ति। मानवशरीरस्य २/३ भागे जलमस्ति। मानव रुधिरेऽपि ८० अंशः जलस्यास्ति। जलं पोषकोऽस्ति। तथा रक्तमाध्यमेन पोषकतत्वान् शरीरस्य विभिन्न स्थाने प्रापयति। शुद्धजले २अंशः हाइड्रोजन वायुः, एकभागः ओक्सीजनवायुः भवति। वर्षायाः जले ओक्सीजनवायुरधिकमात्रायांमिलति। अतः वर्षाजलं शुद्धतमो मन्यते। अथर्ववेदे विभिन्नजलस्य स्वरुपवर्णनं मिलति।

## • जलप्रदूषणम्।

वायुमण्डलात् पृथिव्यामागच्छन् मध्ये अनेकाः विषाक्तवायवः अशुद्धरजकणाश्च जलं

१. यजुर्वेद – ५/२८, २. सामवेद – १/७/१

प्रदुष्यन्ति। तत् जलं भूमौ प्रवहति, तदा जैवाजैव अपद्रव्याःजले मिश्रण भवति। एतत् प्रदूषणमस्ति।

एतादृशं रजकणापद्रव्ययुक्तजलं अस्वास्थ्यप्रद भवति। "प्राक्रितिक जले कोऽपि बाह्य अवाञ्छितपदार्थस्य प्रवेशः येन जलस्य गुणः न्यूनो भवति तत् जलप्रदूषणं कथ्यते।" – पर्यावरण और प्रदूषण डा. अरुण रघुवंशी।।

- **जल प्रदूषणस्य कारणानि।**

१. प्राकृतिक स्रोतः – प्राकृतिक स्रोतेषु भूरक्षणं खनिजपदार्थ वृक्षलतादिवनस्पतीनां पत्राणि वन्यप्राणीनां मलमूत्रादिपतनात् मिश्रणाच्च जलं प्रदूषितं भवति। २. मानवीयस्रोतः– स्ववभाविरुपेण नदी–निर्झर– तडागादीनां जलं शुद्धं भवति। परन्तु तस्मिन् जले जनाः नगरस्य मलमूत्रादियुक्तविषाक्तप्रदूषितजलं तत्र शुद्धजले कूल्य'द्वारा नयन्ति। अतः बहिःस्रावकारणेनाऽशुद्धो भवति। जलशुद्धिः कर्तुं सूर्यतापः प्रमुखोऽस्ति।

जलं मानवजीवनाधारो वर्तते। तस्योपयोगिता प्रदूषणं संरक्षणमित्यादि विषये ऋषयः पूर्णतया ज्ञाता सन्ति। जलस्य विभिन्नस्वरुपान् अथर्ववेदे विभिन्न नाम्ना वर्णनं कृतमस्ति। यथा–

**यददः संप्रयतीरहावनदता हते तस्मादनद्यो नामस्थता वो नामानि सिन्धवः।।**[१]

मेघवृष्टिद्वारा अथवा सूर्यतापात् हिमोद्रवीभूतकारणात् यदा नदीषु अधिकमात्रेण जलमागच्छति, तदा जले महानादो भवति। अतः जलप्रवाहान् नदी अर्थात् नादकरणीति कथ्यते। अत्र अलवणजलीय पर्यावरणस्यापर भेदः प्रवाहित जलस्वरूपस्यस्पष्टोल्लेखोऽस्ति। "यदा वरुणेन प्रेरितो जलं शीघ्रगतिना प्रवाहति, तदा इन्द्रः तं प्राप्नोति। प्राप्तकारणादेव जलप्रकाराः।

जलस्य आरोग्यवर्धकगुणान् वर्णयन् वैदिकऋषिः जलस्य विभिन्न स्रोतप्रकाराणां वर्णनं कृतमस्ति। जलं षट्स्रोतेभ्यः उपलब्धः भवति।

- दिव्याः आपः(अथर्व. १/४/३) वृष्टि द्वारा प्राप्तजलम्।
- वार्षिकी आपः(अथर्व. १/६/४) वृष्टि द्वारा प्राप्तजलम्।
- सिन्धुः (अथर्व. १/४/३) अथति नदी वा समुद्रात् प्राप्तजलम्।
- अनूप्याः आपः (अथर्व. १/६/४) अर्थात् जलमयप्रदेशे प्राप्तजलम्।
- धन्वयाः आपः (अथर्व.) अर्थात् मरुदेशात् बालुकामयप्रदेशात् वा अल्पवृष्टिमय प्रदेशात् प्राप्तजलम्।
- खनित्रियाः आपः(अथर्व. १/६/४) अर्थात् कूपतडाभ्यां प्राप्तजलम्।

१. अथर्ववेद – ३/१३/१,

उपर्युक्त विवरणैः ज्ञानं भवति यत् जलस्रोतासि आदिकालतः सन्ति, येषां ज्ञानं पुरातनऋषीन् पूर्णतया आसीत्।

- **जलप्रदूषणस्यावधारणम्।**

वृष्टितः प्राप्त जलमपि बालुकायां पङ्के वा पतनात् दूष्यति। कूपस्य स्वच्छ जलमपि घटे अधिकदिन स्थापनात् भिन्न गुणधर्मि भवति। उपर्युक्तं विषयं लक्षीकृत्य ऋषिः कथयति–"कुम्भे अमृताः" नद्याः जलं कूपजलात् अधिकं सुद्धं भवति। **"असूर्या उप सूर्ये याभिर्वा सूर्य सह।" अथर्व.– १/४/६** ।

उक्त्वा वैज्ञानिकसत्यस्योद्घोषो कृतोऽस्ति, यत् सूर्यकिरणा न पतन्ति तज्जलं न्यूनशुद्धं भवति। एवं प्रकारेण कूपोपरि वृक्षछाया पतति सदा तदापि जले शुद्धता न्यूना भवति।

**"अम्बयोः यन्त्यध्वभिः।" (अथर्व. १/४/१)** मधुः अर्थात् नद्यः स्वमार्गे प्रवहन्ति उक्त्वा गतिमानजलं स्थिरजले कृमि कीटकादीनां भयो भवति।

**"पृधन्तीर्मधुना पयः।"(अथर्व. १/४/१)** मधुः अर्थात् पुष्परागादि जले पतनादपि जलं दूष्यति। इत्युक्ति द्वारापि जलप्रदूषणे संकेतो प्राप्यते।

**"यत्र गावः पिबन्ति।" (अथर्व. १/४/३)** जलाशये गावः जलं पिबन्ति इति कथनात् पशु द्वाराऽपि जलप्रदूषितं भवतीति संकेतः।

उपर्युक्त संकेतैः स्पष्टो भवति यत् ऋषयः प्राचीनकालदेव जलप्रदूषणात् विज्ञाः आसन्। जलस्य शुद्धता विषये सज्जा सावधानाः आसन्। ते कथयन्ति यत् मधुरं–शुद्धम् उत्तमं पवित्रं च जलं ग्रहणीयम्।

- **शुद्धजलस्यावधारणम्।**

ऋषयः कथयन्ति जलं जीवनम्। जलस्यापरो नाम अमृतमस्ति। जीवनरूपी रसो वैजलम्। यथा अथर्ववेदे **"अप्सु अमृतम्" (१/४/४) "अप्सु भोषजम्"(१/४/४)** अर्थात् जलं अमृतमयं औषधमयं चास्ति। मृत्योर्रक्षति जलम्। शरीरात् दोषान्निसार्य शरीरं विकाररहितं

करोति। यथा निम्न मन्त्रेण स्पष्टो भवति।

आप इद्वा उ भेषजीरापो अगीचातनीः।

आपो विश्वस्य भेषजीस्तास्त्वामुञ्छन्तुः क्षेत्रियात्।।[1]

अर्थात्– जलम् औषधिरस्ति। जलं रोगनाशकोऽस्ति। जलं सवेषां रोगाणाम् औषधिरस्ति। तज्जलं त्वां क्षयगरोगात् रक्षेत्। यथा–

इमा आः प्रभराम्ययक्ष्या यक्ष्मनाशिनी।

गृहानुपुसीदामि, अमृतेन सहग्निना।।[2]

रोगनाशकं रोगरहितं जलं प्रभरामि। अयं मन्त्रः गृहे शुद्धमारोग्यवर्द्धकं जलं आनेतव्यमितितूचयति।

द्वे गुणे युक्ते जलं हि "शिवतमः रसः" (अथ. १/५/२) जलमत्यन्तकल्याणकारी रसोऽस्ति। केवलं शिवः न परन्तु शिवतमोऽस्ति। जलस्यापरं नाम वीर्योऽस्ति। ऋषिः कथयति– '

'अपामुत प्रशस्तिभिखा भवथ वाजिनो–गावो भवथ वाजिनी।।"[3]

अत्र अक्षः (पुरुषः) वाजिनः, गावः वाजिनी द्वौ पुरुषस्त्री वाचकौ। जलेनैव द्वौ वीर्ययुक्तौ भवतः। शुद्धजलं प्रवाहितं कर्तुं मातृभूमेः प्रार्थनाऽपि कृतमस्ति अथर्ववेदे–

शुद्धा न आपस्तेन्वे क्षरन्तु यो नः सेदुरप्रिये। तं निदध्यः पवित्रेण पृथिवी मोत पुनामि।।[4]
हे मातृभूमे निस्सृतजलं अस्माकम् अनिष्टकारकतत्वान् नश्यतु। अथर्ववेदस्य एकोनविंशतिकाण्डे पुनः जलस्यद महिमा गायन् कथयति–

सं सं स्रवन्तु नद्यः सं वाता सं पनगिणः।।अथर्व.१९/१/१।।

हिमालयात् प्रवाहितं जलं तुभ्यं कल्याणं करोतु।

शंत आपो हैमवतीः शमुतो सन्तुत्स्याः।

शं ता ते सनिष्यन्दाः आपः शमु सन्तु वर्ष्याः।अथर्व.१९/२/१।।

---

१. अथर्ववेद –३/७/५, २. – ३/१२/९, ३. – १/४/४, ४. १२/१/३०,

अस्मिन् मंत्रे विभिन्न स्रोतांसि तेषां जल प्रवाहेण जायमान आप्लावात् हानिर्भवति, एतादृशः आप्लावः न स्यात् तदर्थं शुभकामनां कृतमस्ति। अथर्ववेदे(१९/२)–

MT. HANSA MEHTA LI
THE MAHARAJA SAYAJIRAO UNIV
The M.S. University

**शं त आपो धन्वन्याः शं ते सन्त्वनूप्याः।**

**शं ते खनिजिमा आपः शं याः कुम्भेभिराभताः।।२।।**

**अनुभूयः खनमानाः विप्रो गंभीरे अपसः। भिषग्भ्यो भिषक्तरा आपो अच्छावादमसि।।३।।**

**अपामह दिव्याऽनापमां स्रोतस्थानाम्। अपामह प्रणे जनेऽश्वाः भवथ वाजिनः।।४।।**

**ता अपः शिवा अपोऽयक्ष्मंकरणीरपः। यथैव तृप्यते मयस्तास्त आदत भेषजी।।५।।**

उपर्युक्तमन्त्रेषु ऋषिः जलस्य विभिन्न स्रोतांसि आरोग्य–बलवर्धकानि जलचिकित्सार्थम् उपयोगीनि भवन्तीति सूचितं वर्तते। जलं जीवनं मत्वा ऋषयः प्रार्थयन्ति (अथर्व. १९/६९)–

**जीवास्थ जीव्यासं सर्वमायुर्जीव्यासम्।।१।।**

**उपजीवा स्थोप जीव्यासं सर्वमायुर्जीव्यासम्।।२।।**

**संजीवास्थ जीव्यासं सर्वमायुर्जीव्यासम्।।३।।**

**जीवात्मा स्थ सं जीव्यासं सर्वमायुर्जीव्यासम्।।**[१]

अत्र जलं भूयोभूयः जीवः, उपजीव्यः, संजीवः, जीवात्मा, कथनेन तं जीवनस्वरूपं स्वीकृत्य जलं प्रति कृतज्ञता प्रकटी कृताऽस्ति।

शुद्धजलं तस्य विभिन्नस्रोतानामुल्लेखो संस्कृतस्यादिग्रन्थे ऋग्वेदेऽपि प्राप्यते। यथा–

**या आपो दिव्या उत व सुवन्ति, खनित्रिगा उत व याः स्वञ्जाः।**

**समुद्रार्था वा शुचयः पावकास्ता, आपो देवीरिह मामवन्तु।।**[२]

आकाशात् पतितंजलं, यं नद्यां गमनशीलोऽस्ति। कृपस्रोतांसि जलं अष्मान् रक्षन्तु। एतादृशी धारणा यजुर्वेदेऽपि प्राप्यते–

---

१. अथर्ववेद –१९/२/४, २. ऋग्वेद –७/४९/२,

अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय तिष्ठक्तीभ्यः स्वाहा।

स्यन्दमानाभ्यः स्वाहा कूपाभ्यः स्वाहा।

धार्याभ्यः स्वाहाऽर्णवास्वाहा

समुद्राय स्वाहा सरिराय स्वाहा।।[१]

अर्थात्– पेयं, रोगनिवारकम्, उर्ध्वगामीनं, स्थिरं, स्रोतः प्रवाहितं, कूप्यं, धार्यं वायौ समुद्रे स्थिराय स्वाहा।

उपर्युक्त कथनेन स्पष्टं भवति यत् वेदस्थ ऋषीणां पर्यावरणस्यावधारणं वर्तमान वैज्ञानिकमिव विज्ञानानां तथ्यानुसारेणाऽसीत्।

## (४) वनस्पति पर्यावरण पर्यावरणम्।

अथ वैज्ञानिकैः प्रदूषणनिवारणार्थ वृक्षाणां वनानां च महत्वं सर्वोपरि स्वीकृतम्। यतो हि हानिकारकं वायुमात्मसात्कुर्वन्ति जीवनदायकं च सुखकरं वायुमुद्वहन्ति। इदमेव वैज्ञानिकं सत्यं प्रमाणीकृत्यैव वेदमन्त्रेषु वृक्षेभ्यो वनेभ्यस्तत् पालकेभ्याश्च सश्रद्धं नमः कृतवान् **(यजु. १६)**–

- नमो वृक्षेभ्यः।१७।
- ओषधीनां पतये नमः।१९।
- नमो वन्याय च।३४ ।
- अरण्यानां पतये नमः।२० ।

ऋग्वेदस्य दशमे मण्डले एकं सम्पूर्णं सूक्तं वनदेवतायै प्रस्तुतम्। 'तच्च अरण्यानि सुक्तम् ' इति नाम्ना प्रथितम्।

वृक्षवनस्पतिवनसंरक्षकाः संवर्द्धकाश्च सम्मानयोग्या सन्ति, यतः ते प्राणीनामाधारपोषकतत्वान् रक्षयन्ति। वन्य वृक्षोत्पन्नैः फलाऽहारैः प्राणी स्वस्थो भूत्वा संसारकार्ये संलग्नो भवति। अथर्ववेदः वनसम्पदां प्रति कृतज्ञता प्रकटयति। यथा–

**तिस्रो दिवास्तिस्रः पृथिवीः षट्चेमाः प्रदिशः पृथक्।त्वयाहं सर्वाभूतानि पश्यामि देव्योषधे।। अथर्व.४/२०/२।।**

१. यजुर्वेद – २२/२५

वैदिकऋषयः वनस्पत्यौषधीनां महत्वं जानन्ति स्म। तेषां गुणैरपिपरिचितारासन्। अतः ते सर्वान् लोकान् कथयन्ति, यत् भवन्तोऽपि वनस्पतीनां महत्वंजानीयुरिति। अथर्ववेदस्यऋषिः कथयति–

**याश्चाहं वेदवीरुधो याश्च पश्यामि चक्षुषा।**

**अज्ञाता जानीमश्च या यासुविध च स ।।**

**सर्वाः समग्राः औषधिबोधन्तु वचसोमन।**

**यथे मे पारयामसि पुरुषे दुरितादधि।।** [१]

ऋग्वेदानुसारेण सर्वे औषधयः दैहिक–दैविक– भौतिकतापान् दुःखानि च मूलतः नश्यन्ति। यथा–

**त्रिनो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिकदत्तमद्भ्यः।**

**ओमानं शंयोर्मकाय सूनवे त्रिधातु शर्म वहतंशुभस्पती।। ऋग्.१/३४/६।।**

वृक्षाः, वनस्पतयः, औषधयश्च सर्वेषां कृते हितकराः शान्तिदायकाश्च भवेयुः एतादृश्यः कामनाः निम्न वेदमन्त्रेषु अभिव्यक्ताः सन्ति–

**मधुमानो वनस्पतिः।** [२]

**सुमित्रायाः न आपः ओषधयः सन्तु।।**[३]

**ओषधयः शान्तिः वनस्पतयः शान्तिः।। यजु.३६/१७।।**

**माध्वी र्न सन्त्वोषधीः।।यजु.१३/२७।।**

**या रोहन्यांगिरसीः पर्वतेषु समेषु च ।**

**तानः पयस्वतीः शिवा औषधीः सन्तु शं हृदेः।।अथर्व.८/४/१७।।**

अत्रेदं ज्ञातव्यं यत् – वनस्पतिः, वृक्षः औषधीश्चेत्यादयः शब्दाः वैदिकेषु लौकिकेषु च कोशेषु प्रायशः एकस्मिन्नेवायर्थे प्रयुक्ताः। मन्त्रद्रष्टारः ऋषयस्तथ्यमिदं जज्ञुः,

---

१. अथर्ववेद–७/७/१७,२०, २. ऋग्वेद –१/१०/८, ३. यजुर्वेद–३६/३३

यत् वृक्षाः लताश्च न केवलं पुष्पैः फलैः, काष्ठादिभिश्चाखिलं जगत् समृद्धं कुर्वन्ति, अपितु प्राणदायक वायुना पर्यावरणमपि माधुर्यमय विदधति।

वनस्पतीन् स्पर्शकुर्वन् प्रवहतो वायुः गुणकारी भवति। यः रोगान् निवारयति, तं प्रार्थयति वैदिक ऋषिः –

**"यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः। यत्पर्वतेषु भेषजम्।।"[१]**

अन्यच्च–

**" मरुतो मारुतस्य न आ भेषजस्य वहता सुदानव यूयं सरवायः सप्रयः।।" ऋग्. ८/२०/२३।।**

वेदमन्त्रवर्णितस्य भेषजवातस्य स्रोतांसि तान्येव वनानि येषां महत्वं वैदिकैः ऋषिभिः– यथा–

**"नमो वन्याय च।" (यजु. १६/३६), "वनानां पतये नमः।" (यजु. १६/१८)** इत्यादि मन्त्रेषु मुक्तकण्ठेन गीतम्।

अरण्यानि, विटपाः, वनस्पतयो, लताश्च प्रदूषणं दूरीकुर्वन्ति परिशुद्धं सुगन्धितं च गन्धवहं प्रवाहयन्ति, जलदानात्पादने च साहाय्यं कुर्वन्ति। अनेन प्रकारेण ते महदुपकारकाः पर्यावरणस्य इति। अतस्ते सर्वथा संरक्षणीयाः। न केवलं संरक्षणीया अपि तु नूतनमारोपणीयाः। एकस्मिन् मन्त्रे वृक्षारोपणं सुस्पष्टमादिम्। यथा–

**"वनस्पतिं वन आस्थापयध्वम्।" (ऋग्. १०/१०१/१)**

एवमेववृक्षाणां हिंसायाः निषेधोऽपि विद्यते वेदमन्त्रेषु। तत्र पर्यावरणरक्षायै वृक्षातिरिक्तं जलानां भूपेश्चाऽपि हिसा निषिद्धा। यथा–

**"माऽपो मौषधीहिंसीः।" (यजु. ६/२२)**

**"पृथिवीं मा हिंसीः।" (यजु. १३/१८)[२]**

**"मा काकम्बीरमुद्वहो वनस्पतिम्।"( ऋग्. ६/४८/१७)**

**यदर्णसं मोक्षाथा वृक्षम्।।( ऋग्.५/५४/६)**

---

१. ऋग्वेद –८/२०/२५, २. यजुर्वेद –१३/१८

वृक्षाणां कृन्तनमेव तेषां हिंसा। मलमूत्रादिविसर्जनेन जलानां प्रदूषणं च जलानां हिंसा। इत्थमेव बह्वन्नलाभाय रासायनिकामुर्वरकाणामतिप्रयोगेन पृथिव्या शोषणं तस्यां च दूषितपदार्थानां प्रक्षेपणं पृथिवी हिंसा।

वेदानुसारेण केवलं महावृक्षाः नैव अपितु अखिलवनसम्पदा, वनस्पतिजगत् चापि वन्दनीयाः, तथा ये जनाः वृक्षान् वनानि च रक्षन्ति तेऽपि वन्दनीया सन्ति।

भारतीय संस्कृतौ वृक्षाः देवरूपेण पूज्यन्ते। प्राचीनकालतैषा परम्परा प्रचलति। अधुनाऽपि भारतीय नार्यः व्रतोत्सवे अश्वत्थ, तुलसी, नीम्ब, वटादीन् पूजयन्ति। इति।

## ५) वेदेषु ऊर्जा संरक्षणम्।

वेदेषु अग्नितत्त्वस्य पर्यावरणनिर्माणार्थं संरक्षणार्थाञ्चाऽधारशक्ति रूपेण निरूपणं वर्तते। अखिलजगति ऊर्जाग्नि तत्त्वोऽस्ति। अयं "वैवरनरः" अग्नि नाम्ना व्यवहृतोऽस्ति। यः विश्वं कार्ये संयोजयति सः वैश्वानरः शक्तिः वर्तते। सृष्टि निर्माणे मुख्यकारकतत्त्वं अग्निरस्ति। अस्य महत्त्वं वैदिकऋषयः जानन्ति स्म। अतः मधुछन्दा ऋषिः ऋग्वेदे कथयति। यथा—**"अग्निमीले।"(ऋग् १/११)** अर्थात् अग्निमिच्छामि, स्तौमि च।

ऋग्वेदस्य कश्यपः ऋषिः कथयति यत् य अग्नितत्त्वस्योपासना करोति, सः सर्वाणि सुखानि प्राप्नोति। यथा—

**अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि सान्ति।**

**अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः।।ऋग्.५/४४/१५।।**

पर्यावरणसंरक्षणसंदर्भे वेदेषु सूर्योर्जा सर्वश्रेष्ठः मन्यते। तथा सूर्याऽस्य जगतः आत्मा कथ्यते। ऊर्जायारुपयोगविषये ऋग्वेदः कथयति चेत् ऊर्जायारुपयोगः विवेकाऽनुसारेण स्यात्, ऊर्जायाः रक्षणं यदि वयं कुर्मः, तर्हि ऊर्जाऽस्मान् रक्षति। यथा ऋग्वेदे काण्वऋषिः कथयति—

**नित्वा होतारमृत्विजं दधरे वसुवित्तमम्।**

**श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु।।ऋग्. १/४५/७।।**

यो कोऽपि अग्नितत्त्वं क्षतिः प्रापयति, तस्य कृते अथर्ववेदे दण्डाविधानं वर्तते। यथा—

**अग्ने यत्ते तपस्तेन तं प्रतितप।अथर्व.२/१९/१।।**

अन्यच्च–

**अग्ने यत्रे शोधिस्तेन तमतेजसं कृणु।ओऽस्मान् द्वेष्टि यं वयं द्विष्मः।।अथर्व.२/१९/४।।**

सूर्यस्य ब्रह्मण्डे उच्चस्थानं वर्तते। तस्य स्वरूपस्याऽनूेलता सर्वान् आवश्यकोऽस्ति। कारणञ्च यदि सूर्यकिरणाः प्रखराः वा न्यूनाः भवन्ति तदा सृष्टेः सृजनप्रक्रियायां प्रतकूलप्रभावो भवति। अतः सूर्यस्याऽनु आवश्यकी वर्तते। अथर्ववेदः कथयति। यथा–

**अभयं द्यावा पृथिवी इहास्तु नोऽभयं सोमः।**

**सविता नः कृणोतु।।" अथर्व. ६/४०/१।।**

सूर्यः सर्वान् रक्षति, अतः तस्य रक्षक प्रकृतिं सानुकूलं कारयितुमस्माभिः ध्यानं दातव्यम्। येन सः सर्वप्राणिनामुपरि शान्तदृष्टिप्रक्षेपः कृर्यात्। यथा–

**"सूर्य चक्षुषा मा पाहि।"** [१]

ऋग्वेदे किरणानां प्रार्थना विद्यते। यथा–

**"येन पावक चक्षुषा भुरण्यन्तञ्जनां अनु। त्वं वरूण पश्यसि।" (ऋग्. १/५०/६)**

सूर्योर्जा विकासवृद्धयोः द्योतकोऽस्ति। यथा–

**" सूर्यः यत्तेऽर्चिस्तेन तं प्रत्यर्च।"(अथर्व.२/२१/३)**

सूर्यः निरन्तरं विद्युदुत्पन्नं करोति। यथा–

**" विद्युद्धस्ता अभिद्यवः"।** [२]

सूर्यः ऊर्जायारनन्तस्रोतोऽस्ति। सूर्यपवनयोर्वर्णनमथर्ववेदे कष्टहर्ता देवतारुपेण वर्तते। यथा–

**तवव्रते निविशन्ते जना सस्तय्युदिते प्रेरतेचित्रभानो।**

**यवं वायो सविता भुवनानि रक्षथस्तौ नो मुञ्चतमंहसः।। (अथर्व.४/२५/३)**

---

१. अथर्ववेद –२/१६/३, २. ऋग्वेद –८/७/२५,

यजुर्वेदे सूर्ये जलरसं वर्ततेति वर्णन प्राप्यते। यथा–

**" अपां रसम् उद्वयसं सूर्यसन्त समाहितम्। अपां रसस्य यो रसः" ।यजु.९/३।**

अन्यच्च– यजुर्वेदे वर्णनं प्राप्यते यत् सूर्यस्य सुषुम्णनामकिरणः चन्द्रं प्रकाशयति ।यथा–

**" सुषुम्णः सूर्यरश्मिश्चन्द्रमागन्धर्वः" ।(यजु.१८/४०)**

वैदिककाले मनुष्यः ऐश्वर्यवादी नाऽसीत्। जनसंख्याऽपि अधिका नाऽसीत्, तथाऽपि तदानिन्तनजनाः ऊर्जायाः प्रयोगं विचार्यमर्यादापूर्वकं कुर्वन्ति स्म।

**(६)पर्यावरणसंरक्षणे यज्ञमहत्वम्।**

वैदिककाले संसारस्याऽखिलप्रक्रिया यज्ञमयाऽसीत् । अस्य तथ्यस्य पुष्टिः अनेन मन्त्रेण भवति। यथा–

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**

**ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।** [१]

अखिलब्रह्माण्डे प्राणीनां जीवनार्थं कस्यापि वस्तोरावश्यकता भवति, तस्य सम्बन्धो यज्ञेन सह भवति। यजुर्वेदः सडिण्डिमघोषं वदति। यथा–

**" सुसस्याः कृषी स्कृधि"। (यजुः ४/१०)**

**" कृषिश्च मे यज्ञेन कल्पताम्"।** [२]

**"वृष्टिश्च मे यज्ञेन कल्पताम्"। (यजु.१८/९)**

**"वृष्टिनियन्त्रको यज्ञः"। (यजु.१७/९)**

अतः वैदिकैः पर्यावरणसुद्ध्यर्थं यज्ञस्य महनीयं महत्वं स्वीकृतम्। अग्नौ प्रदत्ता घृतस्य सामग्र्याश्च आहुतयः वायुमण्डलं पवित्रं पुष्टिकरं च कुर्वन्ति। यदा च घृतसामग्री मिश्रिताः आहुतयः वेदमन्त्रोच्चारणपुरस्सरं यज्ञकुण्डे प्रदीयन्ते, तदा तदुत्थितो धूमः वायुमाकाशं धरांजलाञ्च शोधयति, सम्पूर्णवातावरणं परितः सुगन्धितं तथा च स्वास्थ्यप्रदं

---

१.यजुर्वेद– ३१/१६, २. –१८/९,

विदधाति। अतो यजुर्वेदे ऋषिणा आदिष्टम्–

**"घृतेन द्यावा पृथिवी पूर्णेथाम्"। (यजु.५/२८)**

इदं स्वतः सिद्धमेव यत् घृतेन द्यावापृथिवीपूरस्य उपायः यज्ञः एव। सामवेदे हविषा वायुमण्डलशुद्धयर्थं प्रेरणा इत्थं प्रदत्ता। यथा–

**"आ जुहोता हविषामर्जयध्वम्"।**[१]

ऋग्वेदानुसारेण मनुष्यस्याऽभ्यन्तरस्वरुपो यदि विकाररहितोऽस्ति, तर्हि बाह्य पर्यावरणेन सह तस्य व्यवहारोऽनुकूलैव भविष्यति।यथा–

**"यो देवाः पृथिव्यामेकादश स्थिते देवासो हविरिदं जुषध्वम्"।**[२]

यज्ञस्य महत्वं प्रदर्शयन् श्री कृष्णेनाऽपि गीतायम् उक्तम्। यथा–

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**

**अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकाम धुक्।।गीता. ३/१०।।**

**अन्नाद् भवन्ति पर्जन्यादन्नसंभवः।**

**यज्ञाद्भवन्ति पर्जन्यः यज्ञः कर्मसमुद्भव।।गीता. ३/१४।।**

विविध हवनसामग्रीसम्पन्नो यज्ञस्वरुपो बाह्योऽस्ति, अपित्वज्ञिमन् शरीरे बुद्धिद्वाराऽनुष्ठितो यज्ञः आभ्यान्तरो भवति। एतादृशं यज्ञमाध्यात्मिकमपि कथ्यते। अन्ते– न केवलं भौतिकदृष्ट्या, अपितु अध्यात्मिकदृष्ट्यामपि यज्ञस्य महत्ता स्वतःसिद्धा। यज्ञः त्यागमुपदिशति त्यागतयं च जीवनं समाजाय महदुन्नतिकरं समाजे सुखशान्तिवर्धञ्च भवति।

**निष्कर्षः–**

वेदानुसारेण पृथिवी जगतः आश्रयस्थलोऽस्ति। एषा पृथिवी संसारस्य पोषणं वर्धनं च करोति। विविधरुपेण सर्वेषामाकर्षणस्यकारणाऽस्ति। प्राणिनामाश्रयदाता एषाधराऽपारसंसाधनयुक्ताऽस्ति। तस्येमानि विविधरुपाणि चिरस्थायी स्युःढ तदर्थं वैदिकसाहित्यः सदा कामयते।

---

१. सामवेद –१/७/१, २.ऋग्वेद – १९/४/२७

पृथिव्याः संरणस्य यत्र प्रश्नोऽस्ति, तत्र मनुष्यस्यात्मीयसम्बन्धोऽधिकं परिलक्ष्यते। पृथिवीप्रदत्तसंसाधनानां प्रयोगे संवेदना सहानुभूतिश्च अभिलक्षितो भवति। अधुना कोऽपि मनुष्यः पृथिव्याः संरक्षणसन्दर्भे नैव शोचति। अतः वेदानां विचारधारैवसर्वग्राह्योऽस्ति, यत् पृथिवीं रक्षितुं समर्थोऽस्ति।विश्वस्य भरणपोषणकर्तृ वसुन्धरा वेदानुसारमात्मानं विस्तारयति, तथा व्यवहारकृशलैः सह सम्बन्धे सति ऐश्वर्यशालिनी भवति। वेदेषु पृथिवी रक्षणहेतुः आत्मोत्सर्गभावनयैव सर्वान्जीवान् स्वक्रोडेस्थापयितुं सर्वान् रक्षितुं च समर्थाऽस्ति। चेत् सर्वे सामर्थ्यवानैश्वर्यवान् च भवितुं इच्छन्ति, तर्हि निःस्वार्थत्यागभाचना पृथिवीदत्तवस्तूनामुयोगं कृत्वा स्वमतिं प्रकृतिसंरक्षणे निधाय सुसम्पन्ना भवेयुरिति।।

## २. पौराणिकसाहित्यस्य पर्यावरणम्।

"पौराणिक साहित्यस्य पर्यावरणम्" विषये वर्णन प्रसङ्गे प्रथमे तावत्, पुराणस्य महिमा वर्णनेमावश्यकं कारणञ्च "पुराणम्" खलु भारतस्य सत्येतिहासो वर्तते। पुराणैः एव भारतीयजीवनादर्शः भारतीयसभ्यतासंस्कृतेःज्ञानं कर्तुं शक्यते। 'पुराणम्' केवलमितिहासोनैवाऽपितु विश्वोन्नतये मार्गप्रदर्शनमपि करोति। पुराणस्य महिमा पद्मपुराणे। यथा–

**ये पठन्ति पुराणानि शृण्वन्ति च समाहिताः**

**प्रत्यक्षरं लभन्त्येते कपिलादानजं फलम्।।**

**अपुत्रो लभते पुत्रं धनार्थि लभते धनम्।**

**विद्यार्थि लभते विद्यां मोक्षार्थि मोक्षमाप्नुयात्।।** [१]

पुराणश्रवणफलं वामनपुराणे। यथा–

**यथापापानि पूयन्ते गङ्गावारिविगाहनात्। तथा पुराणश्रवणाद् दुरितानां विनाशनम्।** [२]

वेदस्मृत्यादि धर्मशास्त्राणां तत्त्वं पुराणेषु प्रतिष्ठितं वर्तते। नारदपुराणे यथा–

**यज्ञकर्मक्रियावेदः स्मृतिर्वेदो गृहाश्रमे।**

**स्मृतिर्वेदः क्रियावेदः पुराणेषु प्रतिष्ठितः।।**

**यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ।**

**उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते।।** [३]

सर्वेषु मार्गेषु सुखदोमार्गः पुराणमार्गः। शिवपुराणे यथा–

**"अन्यो न दृष्टः सुखदो हि मार्गः, पुराणमार्गो हि सदा वरिष्ठः।**

**शास्त्रं विना सर्वमिदं न भाति, सूर्येण हीना इव जीवलोकः।। (उमासहिता अ. १३)**

यदा वयं सूक्ष्मदृष्ट्या परिशीलनं कुर्मः तदा दृष्टिगोचरो भवति यद् ' पुराणम्'

---

१. पद्मपुराण ब्रह्मखण्ड –२५/२९/३०,२.वामनपुराण –६९/२, ३. नारदपुराण उ.अ.–२४

खलु लोकानां कल्याणार्थं सभ्यभाषायुक्तं सुबोधकथासमन्वितमधुरतमपदविन्यासैः समलंकृतोऽस्ति। पुराणेषुपृथिवीजलवाय्वाकाशपशुपक्षीवनस्पत्यादीनां विषये सम्पूर्णरुपेण वर्णनं प्राप्यते। ये खलु पर्यावरणसंतुलनार्थं महत्वं धारयन्ति।

## (१) भूमिसंरक्षणम् ।

यदा भूमिः वेदप्रदर्शितयज्ञादिकर्मविरोधिदृीतनृपदैत्यादिभिराक्रान्ता भवति, तदा गौ भूत्वा ब्रह्माणं समीपं गच्छति। देवाः सर्वे एकीभूय पुराणपुरुषं नारायणं प्रार्थयन्ति। जगन्नियन्ता नारायणः भूमिभारहरणार्थमहं पसुदेवगृहे प्रादुभविष्यामीति, आकाशवाणीद्वारा संकेतयति। श्रीमद् भागवतपुराणे।यथा–

गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवा च ह ।

गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम्।।

पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदूपजन्यताम्।

स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद् भूवि।।[१]

इदमखिलं विश्वं चराचरात्मकं परमात्मन एव स्परुपमिति श्रीमद् भागवतस्यावधारणा। यथा–

नारायणो भगवति तदिदं विश्वमाहितम्।

गृहीतमायोरुगुणः सर्गादावगुणः स्वतः।।

सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः।

विश्वं पुरुषरुपेण परिपाति त्रिशक्तिधृक्।।[२]

सर्वाणि पञ्चभूतानि सचेतनानिसन्तीत्येव श्रीमद् भागवतदर्शनम्। तेषां चेतनतामस्वीकृत्य यो जडवद् व्यवहरति, स जडएव भवति। भूमिपर्वतावपि चेतनौ। सम्प्रति पर्वतरक्षाविधानं श्रीमद् भागवते स्वयं श्री कृष्णः कथयति–

न नः पुरो जनपदा न ग्रामा न गृहा वयम्।

नित्यं वनौकसस्तात वनशैलनिवासिनः।।[३]

---

१. श्रीमद्भागवत् पुराण –१०/१/२१,२२, २. –२/६/३०,३१, ३. –१०/२४/२४

अरण्यवासीनां कृते पर्वता एव गृहम्। त एव पर्वतीयानां जीवनाश्रयः। अतो विविधैद्रव्यैरद्रेश्चारभ्यतां यज्ञः। यथा–

**तस्माद् गवां ब्राह्मणानामद्रेचारभ्यतां मखः।**

**य इन्द्रयागसम्भरास्तैरयं साध्यतां मखः।।**

**पच्यन्तां विविधाः पाकाः सूपान्ताः पायसादयः।**

**संयावापूपशष्कूल्यः सर्वदोहश्च गृह्यताम्।। (भाग.१०/२४/२५,२६)**

एवं प्रकारेण भगवता श्री कृष्णेन इन्द्रपूजा निषिद्धा गोवर्धनपूजा संयावापूपशष्कुल्यादिभिर्विविधैर्द्रव्यैः कारयित्वा गोवर्धनाय बलिरर्पिता। गोभ्यो यवसं श्वचाण्डालपतितेभ्यश्च यथेच्छ वस्तूनि दत्वा नूतनमार्गः प्रदर्शितः। प्रकृत्या सह तादात्म्यं च स्थापितम्।

## • कूर्मपुराणे भूमिसंरक्षणम्।

भगवान् स्वयं पृथिव्याः महत्वं प्रदर्शयन् पृथिवीं समीकृत्य सृष्टौ पूर्वे पर्वतान् स्व स्व स्थाने स्थापयित्वा सृष्टिकर्मं चकार। यथा–

**पृथिवीं स समीकृत्य पृथिव्यां सोऽचिनोद्गिरीन्।**

**प्राक्सर्ग दग्धानखिलान् ततः सर्गेऽदधन्मनः।।[१]**

भूमिदानस्य महत्वमस्मिन् श्लोके–

**इक्षुभिः सन्ततां भूमिं यवगो धूमशालिनीम्।**

**ददाति वेद विदुषैः यः स भूयो न जायते।।**

**भूमिदानात्परं दानं विद्यते नेह किञ्चन।।[२]**

## • मनुस्मृतै भूमिसंरक्षणम्।

**संमार्जनोपाञ्जनेन सेकेनोल्लेखने न च। गवां च परिवासेन भूमिः शुद्धयति पञ्चभिः।।[३]**

---

१. कूर्मपुराण –पूर्वार्ध ६/२५, २. –उत्तरार्ध २६/१३,१५, ३. मनुस्मृति – ५/१२४

अवकरशोधनेन गोमयाद्युपलेपनेन, गोमुत्रजलादि सेकेन खात्वा, कतिपयमृदपनयनेन गवामहोरात्रनिवासेन पञ्चभिरेकैकशः भूमिः शुद्धयति। अस्मिन् श्लोके पृथिवी कयारित्या शुद्धयति सूक्ष्मरूपेण वर्णनमस्ति। जनाः भूम्याः संरक्षणे जागरूकाः भवेयुः तदर्थं पर्यावरणसंरक्षणपरायोमनुमहाभागैः, अत्र भूमिशुद्धिप्रकारम् वर्णितम्।अन्यच्च–

**नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत्। न मूत्रं पथि कूविती न भस्मनि न गोव्रजे।।**

अर्थात् एकवस्त्रो नान्नं भुञ्जीत। उपस्थाच्छानवासरहितो न स्नायात्। वर्त्मनि, भस्मनि, गोष्ठे च मूत्र पुरीषत्यागं न कुर्यात्।

**नफालकृष्टे न जले न चित्यां न च पर्वते। न जीर्णदेवायतने न वल्मीके कदाचन।।**

अर्थात् फालकृष्टेक्षेत्रादावुदके, यज्ञार्थकृतेष्टकाचये, पर्वते, चिरन्तनदेवतागारे, कृमिकृतमृत्तिकाचये च विण्मूत्रोत्सर्गं कदाचन न कुर्यात्।

**न ससत्त्वेषु गतेषु, न गच्छन्नापि च स्थितः।**

**न नदीतीरमासाद्य न च पर्वत मस्तके।। मनु. ४/४५, ४६, ४७।।**

तथा सप्राणिषु बिलेषु न व्रजन्न चोत्थितो न नदीतट माश्रित्य नापि पर्वतशृङ्गे, मूत्रपुरूषे कुर्यात्।उपरोक्त श्लोकेषु भूमिशुद्ध्यर्थं मनुमहाभागैः (उक्तस्थलेषु) मलमूत्रत्यागं निषेधितः।

यः कोऽपि जनः भूमौ यत्रकृत्राऽपि पुरीषं करोति, भूमिं क्षतिः प्रापयति च तस्य कृते दण्डव्यवस्थाऽपि मनुस्मृतौ आसीत्। यथा–

**समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि। स द्वौ कार्षापणैः दद्यादमेध्यं चाशु शोधयेत्।।**[१]

आपत्तिं विना यो राजपथेषु पुरीषं कुर्यात्स कार्षापणद्वयं दण्डं दधत्स चामेध्यं शीधमेवा पसारयेत्।

**आपद्गतोऽथवावृद्धो गर्भिणी बाल एव वा।**

**परिभाषणमर्हन्ति तञ्च शोध्यमिति स्थितिः।।**[२]

व्याधितवृद्ध गर्भिणी बाला न दण्डनीयाः, किन्तु ते पुनः किं

१. मनुस्मृति –९/२८२, २. – ९/२८३

कृतामितिपरिभाषणीयाः। तञ्चामेध्यं शोधनीया इतिशास्त्र मर्यादा।

- ## गरुडपुराणे भूमिसंरक्षणम्।

भूमिदान महत्त्व प्रदर्शयनत्र गरुडपुरोणे ब्रह्मोवाच–

**भ्रूणहा ब्रह्महा गोघ्नः पितृहागुरुतल्पगः।**

**भूमिं सर्वगुणोपेतां दत्वा पापैः प्रमुच्यते।।[१]**

अन्यच्च–

**नास्ति भूमि समं दानं नास्ति भूमि समो निधिः।**

**नास्ति सत्यसमो धर्मो नानृतात्पातकं परम्।।(ग. पु.अ.३१)**

अस्मिन् श्लोके भूमिं निधितोऽपि उत्तमा निधिःरुपेण वर्णयित्वा भूमिसंरक्षणं प्रति ध्यानं दातव्यमिति सर्वेषां जनानां कृते संकेतोऽस्ति। कूपवापिसरोवरोद्यानादिनिर्माणस्यमहत्वमपि गरुडपुराणे–

**कूपवापीतडागादि आरामाणि च कारयेत्।**

**त्रिसप्तकुलमुद्धृत्य विष्णुलोके महीयते।।[२]**

- ## शिवपुराणे भूमिसंरक्षणम्।

शिवपुराणानुसारेण सूर्यःस्वकिरणैः भूमेः अपवित्रतां नाशयति। यथा–

**यथा रविः स्वकिरणादशुद्धिमपनेश्यति।( शि. पु.१/४५)**

गोशालायामग्निकुण्डेतरुच्छायानगरेषु वीथिषु च ये मलमूत्रं त्यजन्ति, ते नरकगामिनो भवन्ति। यथा–

**गोष्ठाग्निजलरथ्यासु तरुच्छायानगरेषु च ।**
**त्यजन्ति ये पुरीषमुद्यानारामायतनेषु च ।।[३]**

---

१. गरूडपुराण – २१३/१७, २. – २१३/२२, ३. शिवपुराण –२/२२

अन्यच्च–

**देवद्विजगवां भूमिं प्रदत्तां हरते तु यः।**

**प्रनष्टामपिकालेव तमाहुर्ब्रह्मघातकम्।।**

**गवां मार्गे वने ग्रामे यैश्चैवाग्नि प्रदीयते।**

**इति पापानि घोराणि ब्रह्महत्या समानि च ।।( शि.पु.२/२९,३५)**

उपर्युक्तश्लोकेषुनरकब्रह्महत्यादिभीतिप्रदर्शनं कोऽपि जनः पापादिदण्डव्यवस्थाकारणात् भूमिं क्षतिः न प्रापयेत्, सर्वतः शुद्धतास्यादिति पौराणिकव्यासस्य पर्यावरणसंरक्षणे एतादृशं वैज्ञानिकचिन्तनमस्ति।

ब्रह्मपुराणेऽपि भूमिसंरक्षणम्। यथा–

**ग्रामबसथ तीर्थानां क्षेत्राणां चैव वर्त्मनि।**

**न विण्मूत्रमनुष्ठेयं न च कृष्ठटे न गोव्रजे।।**[१]

**(२)जलसंरक्षणम्।**

पर्यावरणसंरक्षणे जलसंरक्षस्यमहत्वमपि न्यूनं नास्ति। कूर्मपुराणे यथा–

**आपो नारा इति प्रोक्ता आपौ वै नरसूनवः।**

**अयनं तस्य ता यस्मात्तेन नारायणः स्मृतः।।**[२]

आपः अर्थात् जलं नारा इति कथिता। अतः जलैवनरस्याश्रयस्थानं विद्यते। तेन तं नारायणः स्मृतः।

**जलक्रीडासु रुचिरं वाराहं रूपमास्थितः।अधृष्यं मनसाप्यन्यैर्वाङ्मयं ब्रह्मसंज्ञितम्।।**[३]

सैव देवः जलक्रीडासु सुन्दरं वाराह रूपं दधारः। यम् रुपम् अन्यैर्जनैः मनसापि अगम्य आसीत्। यदा जलाभावो भवति, तदा मेघाः अस्मान् जलंददति। वृष्टौ जाते सतिपृथिवी शस्यश्यामला भवति,वृक्षलतादिसर्वे प्रादुर्भवन्ति, यत्सर्वेषां कृते हिताय भवति। यथा–

**अपां सौख्ये प्रतिहते तदामेवात्मना तु वै।**

**मेघेभ्यस्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनम्।।**

**सकृदेव तया वृष्ट्या संयुक्ते पृथिवी तले।**

**प्रादुरासन् तथा तासां वृक्षा वै गृहसंज्ञिता।।कू.पु.पूर्व २९/१९,२०,२१)**

---

१. ब्रह्माण्डपुराण – २/२२, २. कूर्मपुराण –६/५, ३. – ६/८

स्वच्छजलप्राप्तिस्थानानि तेषां विकासश्च। यथा–

**तासां वृष्ट्युदकानीह यानि निम्नैर्गतानि तु।**

**अभवन् वृष्टिसन्तत्या स्रोतः स्थानानि निम्नगाः।।**

**यदा आपो बहुतरा आपन्नाः पृथिवीतले।। (कू.पु.पूर्व २९/३३,३४)**

नीचैः पतितं वर्षाजलं वृष्टिसन्तत्या नदीरुपेण परिणतां गताः।

**अपां भूमेश्च संयोगादौषध्यस्तास्तदाभवन्।**

**अफालकृष्टाश्चानुप्ताग्रामाख्याश्चतुर्दशः।।**

**ऋतुफलपुष्पैश्चैव वृक्षगुल्माश्चजज्ञिरे।**

**ततः प्रादुर भूत्तासांरागो लोभश्चसर्वशः।।(कू.पु.पूर्व२९/३५,३६)**

पृथिवीतले जलभूमिसंयोद् औषधयः ग्रामे, अरण्ये,सर्वतः वृक्षाःगुल्माश्च अभवन्।ऋतुपुष्पफलानि च उत्पन्नोऽभवन्। गङ्गायाः महत्वंप्रदर्शयन् पौराणिको व्यासः वदति यत्कोऽपि जनः अकामो सकामो वा गङ्गायां शरीरत्यागं करोति सः स्वर्गलोकं गच्छति, नरकं कदाचन न पश्यतीति। यथा–

**अकामो वा सकामो वा गङ्गायां यो विपद्यते।**

**स मृतो जायते स्वर्गे नरकं च न पश्यति।। कू.पु. पू. ३७/३९।।**

अन्यच्च– गङ्गायमुनयोः महत्वं प्रदर्शयति अयं श्लोकः यत् गङ्गायमुनयोः सङ्गमे यः कोऽपि साधनां करोति स निरोगि भवति। यथा–

**गङ्गायमुनयोर्मध्ये करीषाग्निञ्च साधयेत्।**

**अहिनांगो हृदयरोगश्च पञ्चेन्द्रियसमन्वितः।।कू.पु. पू. ३८/३।।**

अस्माकं देशे गङ्गायमुने सदृशे अनेकाः नद्यः प्रवहन्ति, ताः समग्रदों स्व जलेन सिञ्चयित्वा भूमिम् औषधि च परिपुष्टं कुर्वन्ति। तासां नदीनां जलं प्रदूषितं न स्यात्, तदथम् अस्माकमपि दायित्वं विद्यते।

मनुस्मृतौ जलसंरक्षणे उदात्तभावना दृश्यते। यथा–

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायतेवृष्टि, र्वृष्टेरन्नं ततः प्रजाः।।**[१]

अर्थात् यजमानेनाग्नावाहुतिः सम्यक् क्षिप्ता रसाहरणकारित्वादादित्यस्यादित्यं प्राप्नोति। स च आहुतिरस आदित्याद् वृष्टिरूपेण जायते। ततोऽन्नम्। तदुपभोगेन प्रजाः जायन्ते।

**आपः शुद्धा भूमिगता वैतिष्ण्यं यासु गोर्भवेत्। अव्याप्ताश्चेदमेध्येन गन्धर्वणरसान्विताः।।** [२]

१. मनुस्मृति –३/७६,   २. –५/१२८,

यत्परिमाणा स्वप्सु गोः पिपासाविच्छेदो भवति, ता आपो गन्धर्वणरसेाालिन्यः सत्यः यद्यमेध्यलिप्ता न भवन्ति तदा विशुद्धिर्भूमिगताविशुद्धाः स्युः।

मनुः अनुसारेण येन जलेन गोः पिपासाविच्छेदो जायतेए यस्मिन् जले दूषितवस्तु पतितं न स्यात् अथवा दूषितवस्तूना जलम् अपवित्रं नास्ति, गन्धवर्णरसयुक्तं एतादृशं भूमौस्थितं जलं शुद्ध भवति। अत्र जल संशोधन विषये मनुना दीर्घदृष्ट्या जलपरिशुद्धिविषयेऽपि च विचारितमस्ति।

**नाप्सुमूत्रपुरीषं वा ष्ठीवनं वा समुत्सृजेत्।**
**अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा।।**[१]

मूत्रं पुरीषं श्लेष्माणं मूत्राद्यमेध्यलिप्तवस्त्रं अन्यद् वा भुक्तोच्छिष्टाद्यमेध्यं रुधिरं विषाणि च कृत्रिमाकृत्रिमभेदभिन्नानि जले न प्रक्षिपेत्। अस्मिन् श्लोके जलसंरक्षण विषये मनोः चिन्तनस्य तात्पर्योऽयं विद्यते यत् पृथिवीतले मनुप्रजाः जलं प्रदूषितं न स्यात् तदर्थ जागरुकाः भवेयुरिति। जलसंरक्षणविषये पद्मपुराणे। यथा— जलदानस्य महत्वं प्रदर्शयन् पौराणिकः पदति—

**यस्यखाते वने गावस्यतृप्यति मासमेव च।**
**यद्वा सप्तदिनात्पूर्वः सर्वदेवैः सपूजितः।।**
**पितृणां तर्पणं शौचं रूपं वै गन्ध्यनाशनम्।**
**बीजं त्विहार्जितं सर्वं, सर्वं तोये प्रतिष्ठितम्।।**
**वस्त्रस्य धावनं रूच्यं भाजनानां तथैव च।**
**तेनैव सर्वकार्यं च पानीयं मेध्यमव च।।**
**तस्मात् सर्वप्रयत्नेन वापीकूपतडागकम्।**
**कारयच्च बलैः बलैः सर्वैस्तथा सर्वधनेन च।।**
**ततो विनिर्जले देशे यो ददाति जलाशयम्।**
**वासरे—वासरे तस्य कल्पं स्वर्गं विनिर्दिशेत्।।**[२]

अन्यच्च— जलतत्त्वस्य महत्वं प्राणीनां जीवननिर्वाहाय अनिवार्योऽस्ति। "जलम्" "नारा" अपि कथ्यते, कारणञ्च तत नरस्यवंशजोऽस्ति।

**आपो नारा इति प्रोक्ता आपो वै नरसूनव।। मा.पु. ४४/५।।**

शिवपुराणे सनत्कुमाराः जनदानं श्रेष्ठदानं, सर्वजीवानां तृप्तिकरं जीवनदायकं च कथयन्ति। यथा—

---

१. मनुस्मृति— ४/५३, २. पद्मपुराण — प्र. भा. अ. ५९/२,८, ९,१०,११,

पानीयदानं नरमं दानानामुत्तमं सदा।

सर्वेषां जीवपूजानां तर्पणं जीवनं स्मृतम्।।

चतुर्विधानां भूतानां तडागः परमाद्ययः।

तडागादीनि सर्वाणि दिशन्तिश्रियमुत्तमम्।।

देवा मनुष्याः गन्धर्वाः पितरौ नागरक्षसः।

स्थावराणि च भूतानि संश्रयन्ति जलाशयम्।।[1]

महाभारते जलसंरक्षणम्– यथा–

तडागं सुकृतं यस्य वसन्तेषु महाश्रयम्।

अत्रिरात्रस्य यज्ञस्य फलं स समुपाश्नुते।।

तडागे यस्य गावस्तु पिबन्ति तृषिता जलम्।

मृग पक्षि मनुष्याश्च सोऽश्वमेघफलं लभेत्।। (म.भा.अ.प.६६/१४/१७)

अग्निपुराणे। यथा–

येषां मध्ये वाति गङ्गा ते देशा पावनावराः।[2]

जलसंरक्षणविषये श्रीमद्भागवते– यदा निदाघातपपीडिताः गावो गोपाश्च यमुपायाःसर्पविषैः विदूषितं जलं पित्वा अचेतनतां प्राप्ताः, तदा तज्जलस्य शुद्धिमन्विच्छन्नेव कृष्णस्तं सर्पं तत उदवासयत्। यथा–

**विलोक्य दूषितां कृष्णां कृष्णः कृष्णहिना विपुः।**

**तस्या विशुद्धिमन्विच्छन् सर्पं तमुदवासयत्।।भा.पु. – १० / १६/१।।**

यमुनायाः तटे वृक्षाः आसन्। तस्मिन् वृक्षेस्थिताः खगा तेन विषाग्निना तप्यमानास्तस्मिन्नेव जले पतन्ति स्म, तज्जलसंसर्गदूषितवायो दोषेण तटवर्तिनः स्थिरजङ्गमाऽन्यजीवाः अपि म्रियन्ते स्म। कालीयनागदर्पदमनं कृत्वा श्री कृष्णेन एतत्सर्वं विशोधितं रक्षितञ्च।

गोपिकानां चीरहरणवृतान्ते यदाध्यात्मिकं रहस्यमस्ति तत्तु सर्वे चीन्तकाः जानन्त्येव। इतः परमस्माकं पौराणिक ग्रन्थेषु जले निर्वस्त्रस्नानं सर्वथा वर्जितमस्ति। पर्यावरणघटक तत्वेषु जलस्य महत्वमधिकं वर्तते। अतः जलशुद्धिरेवैतस्य प्रयोजनम्। यदा गोपिकाः निर्वस्त्राणि भूत्वा जले मज्जान्ति, तदा जलाधिष्ठतृदेवस्य वरुणस्यापराधो भवति। अत एव ताः शिक्षयितुं कृष्णेन वस्त्राणिहृतानि। यथा–

---

१. शिवपुराण उमासंहिता– २ भाग १/१०/११, २. अग्निपुराण –१/१,

यूयं विवस्त्रा यदपो धृतव्रता,

व्यागाहतै तद् तदुदेव हेलनम्।

बद्ध्वाञ्चलिं मूर्ध्न्यपनुत्तयेंऽहसः,

कृत्वा नमोऽधो वसनं प्रगृह्यताम्।।[1]

भूमौ जलम्भवति जीवसङ्कुलेभ्यः जलं प्राणतुल्यतत्त्वम्। अतः जलस्यलौकिकता पवित्रता स्वर्गदातृता च पुराणेषु महर्षि व्यासेन भूयोभूयः वर्णिता। पर्यावरण सन्तूलने जलं महत्वपूर्णस्थानं धारयति तस्य माहात्म्य परिवर्ण्य व्यासः सर्वान् जलसंरक्षणार्थं चेतयति।

**(३) पुराणग्रन्थेषु वनस्पति संरक्षणम्।**

पुराणग्रन्थेषु विविध वनस्पतिनामोषधिनाञ्च यथाप्रसङ्गं सूक्ष्मनिरीक्षणसापेक्षं वर्णनं प्राप्यते। एतेषां वर्णनानामनुशीलनेन पौराणिकपर्यावरण चेतना वैशेद्येन प्रकटी भवति। पुराणेषु विविध औषधीनां लतानां पादपानां, फलानां पुष्पाणां मूलानाञ्च विशदवर्णनं व्यासस्य वनस्पति औषधिसम्बद्धा पर्यावरण चेतनां प्रमाणयति।

अरण्योद्भवानामन्येषामपि वृक्षाणां क्षेदनं न स्यात्, कोऽपि जनः अकारणं विनोशं न कुर्यात्। वनस्पत्योपरि सर्वेषां जनानां मनसि आदरभावं स्यात्। सर्वे जनाः वनस्पतीन् हानिर्प्राप्स्यामः, तर्हि अस्मान् दण्डः भविष्यतीति भीतिः स्यात्, तदर्थं पौराणिक साहित्ये वनस्पतीनां वृक्षादीनां हानिः कृते सति दण्डव्यवस्थाऽऽसीत्। यथा– कूर्मपुराणे–

**फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम्।।(कू.पु.३३/३६)**

अर्थात्– कोऽपि जनः फलदातृणांवृक्षाणां छेदनं करोति तेन ऋक्शतं जपं कर्तव्यम्। अन्यच्च–

**गुल्मवल्लीलतानान्तु पुष्पितानाञ्च वीरुधाम्।**

**अण्डजानां च सर्वेषां स्वेदजानां च विशोधनम्।।**

**फलपुष्पोद्भवानाञ्च घृतप्राशो विशोधनम्।।[2]**

पौराणिककाले पर्यावरणप्रदूषणस्य समस्या नाऽसीत्। तथापि धार्मिक–सामाजिकदृष्टाभ्यां वृक्षाणां महत्वं प्रकाशयन् वृक्षारोपणे तेषां संरक्षणे च प्रेरणा दत्ताऽस्ति। मत्स्यपुराणे वृक्षोपासना तथा वृक्षमहोत्सवविषयस्युल्लेखो प्राप्यते। यथा–

---

१. भागवत्पुराण – १०/२२/१९,  २. कूर्मपुराण –३३/३७,३८,

पादपानां विधिं सूत यथावद् विस्तराद् वद।

विधिना केन कर्तव्यं पादपोद्यापनं बुधैः।।[1]

पौराणिक ऋषीणां कथनमासीत् यत् वृक्षान् शिशूनिव लालयेत् पालयेच्च, वृक्षान् सूवर्णशलाकयाऽञ्जनेन संस्कृतं कुर्यात्। यथा–

अञ्जनद्यापि दातव्यं तद्वद् हेमशलाकया।।[2]

अन्यच्च– सर्वोषध्युदकैः सिक्तान् विष्टातकविभूषितान्।

वृक्षान्माल्यैरलंकृत्य वासोभि परिवेष्टयेत्।। (म.पु.५९/४)

अर्थात्– वृक्षाणां स्वास्थ्यरक्षार्थं यथोचितौषधिजलसुगन्धितद्रव्यमाल्यादिभिः सुशोभितं कृत्वा वस्त्रवेष्टनं कुर्यात् ।

वृक्षरोपणं कृत्वा तेषां पुत्रवत् परिपालनस्योल्लेखो महाभारते । यथा–

तस्मात्तडागे वृक्षा वै रोप्याः श्रेयोर्थिना सदा।

पुत्रवत्परिपाल्याश्च पुत्रास्ते धर्मतस्मृता।।[3]

अन्यच्च– वृक्षारोपणस्य महत्वं महाभारते। यथा–

अतीताना गते चोभे पितृवंश च भारत।

तारयेदवृक्षरोपी च तस्माद् वृक्षान्प्ररोपयेत्।।म.भा.अ.प. ६६/२४।।

वराहपुराणे भूमिगोदानाभ्यामपि श्रेष्ठं वृक्षारोपणं कथयित्वा पर्यावरण संरक्षणस्योत्तममुदाहरणं दत्तमस्ति। यथा–

भूमिदानेन ये लोका गोदानेन च कीर्तिताः।

ते लोकाः प्राप्यन्ते पंभिः पादपानां प्ररोहणे।।(व.पु.१७०/३५)

वृक्षान् पुत्रमिवोद्घोषयन् पुराणकर्ता कथयति यत् यथा सुपुत्रः कुलद्धारको भवति, तथैव वृक्षोऽपि स्वफलपुष्पैः स्वामिनः दारिद्र्यजनितकष्टान् दूरी करोति। यथा–

---

१. मत्स्यपुराण – ५९/१, २. – ५९/३, ३. महाभारत –अ.प. ६६/३,

यथा सुपुत्रः कुलमुद्धरेद्धि यथातिकृत्स्नात् नियमप्रयत्नात्।

तथा प्ररोपाः फलपुष्पभूतः स्वं स्वामिनं नरकादुद्धरन्ति।।व.पु.१७०/३७।।

जनानग्निहोत्रार्थमिन्धनं पथिकानां कृते छाया पक्षीणां कृते निवासं प्राणिनां कृतेपत्रफलत्वगादीश्च प्रदत्वा वृक्षापि पञ्चमहायज्ञसम्पादनं कुर्वन्ति।यथा–

इन्धनार्थंयदानीतमग्निहोत्रे तदुच्यते।

छाया विश्राम पथिकैः पक्षीणां निलये न च ।।

फलमूलत्वगादींश्च औषधार्थं तु देहिनाम्।

उपकुर्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते।।(व.पु. १७०/३८,३९)

बृहद्धर्मपुराणे विष्णुना स्वमुखारविन्देन तुलसीपादपस्य गुणसंकीर्तनं कृतमस्ति। यथा–

एकतः सर्व नैवेद्यं नाना पुष्पानिभूषणम्।एकतः पत्रमेकं ते द्वादशाक्षरमन्त्रवत्।। [१]

पद्मपुराणे वृक्षाणां रोपणमाहात्म्यं स्वयं व्यासः कथयति। यथा–

यस्तु रोपयते तीरे पुण्यवृक्षान्समन्ततः।

तस्य पुण्यफलं ज्ञातुं कथितुं नैव शक्यते।।

अश्वत्थरोपणं कृत्वा जलाशयसमीपतः।

यत्फलंलभते मर्त्यो न तत् कर्तुंशतैरपि।।(प.पु.प्र.भा.अ.६०/२,५)

स्कन्दपुराणस्य नागरखण्डे वृक्षान् विश्वस्य प्रमुखरचनाकथितमस्ति। यथा–

आदौ सर्वं वृक्षमयं पूर्वं विश्वमजायत।।स्क.पु.२४७/२१)

वृक्षेषु देवांशो वर्तते, अतः वृक्षाः पापहा वर्तन्ते। यथा–

एते वृक्षाः महाश्रेष्ठाः सर्वे देवांशसम्भवाः।एतेषां स्पर्शनादेव सर्वपापैः प्रमुच्यते।।

अश्वत्थं रोपयेद् यस्तु पृथिव्यां प्रयतोनरः।तस्य पापसहस्राणि विलयंयान्ति तत्क्षणात्।।[२]

---

१. बृहद्धर्मपुराण –८/२०,        २. स्कन्धपुराण – २४७/२२,३८

वृक्षैः सहास्माकं रक्तसम्बन्धोऽस्तीति श्री मद् भागवतः प्रमाणयति। दक्षप्रजापतिरेवास्माकं सर्वेषां पितास्ति। स तु वृक्षकन्यायां जातः। यथा–

अलंदग्धैद्रुमैर्दीनैः खिलानां शिववस्तु व ।

वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम्।।

इत्यामन्त्र्यवरारोहां कन्यामप्सरसीं नृप।

सोमो राजा ययौ दत्वा ते धर्मेणोपयेमिरे।।

तेभ्यस्तस्यांसमवद्दक्षः प्राचेतसः किलः।

यस्य प्रजा विसर्गेण लोका आपूरितास्त्रयः।। (भाग.६/४/१५,१६,१७)

एषः सम्बन्धो ह्यस्माकं हृदयेषु चेत् नानुभूयते, तर्हि कथं तेषां रक्षास्माभिविधीयेत्। अन्यच्च– दशमस्कन्धे भगवता श्रीकृष्णेन स्वयमेव वृक्षाणां माहात्म्यं गोपेभ्यः वर्णितम्। यथा–

निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः।

आतपत्रायितान् वीक्ष्यद्रुमानाहव्रजौकसः।।

हे स्तोककृष्ण हे अंशो श्री दामन् सुबलार्जुन।

विशालर्षभ तेजस्विन् देवप्रस्थवरुथप।।

पश्यतैतान् महाभागान् परार्थैकान्तजीवितान्।

वातवर्षातपहिमान्सहन्तो वारयिन्तिनः।।

अहो एषां वरं जन्म सर्वप्राण्युपजीवनम्।

सुजनस्यैव येषां वै विमुखा यान्ति नार्थिनः।।

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।

गन्धनिर्यासभस्मास्थितोक्मैःकामान्वितन्वते।।

एतावज्जन्मसाफल्यंदेहिनामिह देहिषु।

प्राणैरर्थैर्धिया वाचा श्रेयःएवाचरेत् सदा।।( भाग. ३०/२२/३०,३१,३२,३३,३४,३५)

**अन्ते निष्कर्षतः** कथयितुं शक्यते यत् पादपानां जीवनं सर्वश्रेष्ठोऽस्ति। कारणञ्च इमे परोपकाराय स्व शिरसि वातं वृष्टिरातपं हिमञ्च सहमाना चास्मानुपद्रवेभ्यो वारयन्ते। एतेषामेव जन्मसफलम्। श्री कृष्णलीलाव्याजेन श्री व्यासेन वृक्षाणां रक्षाविधानं कृतमिति।।

## ३. उपनिषद्ग्रन्थेषु पर्यावरणम्।

### ❖ उपनिषद् ग्रन्थे पर्यावरणम्।

उपनिषद्ग्रन्थाः भारतीय संस्कृतौ शिखरायभूता सन्ति। वैदिकसाहित्ये यथा पर्यावरणस्य चिन्तनमस्ति तथैव उपनिषद् ग्रन्थेऽपि पर्यावरणस्य चिन्तनं प्राप्यते।

कृष्णयजुर्वेदीय कणेपनिषानुसारेण अयं ब्रह्माण्ड, एकोऽखत्थ वृक्षोऽस्ति यस्य मूलानि उपरि शाखाः नीचैः प्रसारितानि सन्ति। जीवः जगत्, जगत्नियन्तापरह्मश्च सर्वेऽस्मिन् अश्वत्थ वृक्षे समाश्रिताः सन्ति। यथा–

**ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।**

**तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते।।१।।**

**तस्मिंल्लोकाः श्रिताः सर्वेः तदुनात्येति केचन एत द्वेतत्।।२।। (कठोपनिषद– २/३)**

अर्थात् एषः ब्रह्मादिस्थावरान्तसंसारः अश्वत्थः संसारवृक्षः सनातनः प्रवाहरूपेणानादिसिद्धः। तस्मिन् संसारवृक्षस्य कारणभूते ब्रह्मणि सर्वेलोकाः पृथिव्यादयस्यतुर्दशभुवनानि चराचरात्मकजनाश्च श्रिताः स्थिताः कश्चन कोऽपि पदार्थः तत् ब्रह्मनात्येति परित्यज्य न वर्तते।

अस्मिन् वृक्षे जीवब्रह्मयोः स्थितिः किदृशोऽस्ति? अस्य सुन्दरं वर्णनं मुण्डकोपनिषदि। यथा–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**

**तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्यो अभिचाकशीति।।मुण्डकोपनिषद– ३/१।।**

अर्थात् द्वौ सुपर्णौ पक्षिणौ सर्वदायुक्तौ सखायौ चिन्मयत्वेन समानरूपौ एवं भूतौ जीवेशौ अविशेषमेकं वृक्षतुल्यं शरीरं परिष्वक्तवंतौ पक्षिरूपेणोक्त जीवेशयोर्मध्ये ईशाद्भिन्नो जीवः पिप्पलं सुखदुःखात्मकं कूर्मफलं स्वादु यथा स्यात्तथा मुक्ते अन्यः जीवाद्विलक्षणोनित्यशुद्ध स्वभाव ईश्वरः अनेनन् कर्मफलभुञ्जानः सन् केवलं पश्यति।

अस्मिन् जीवशिव विषये तैत्तिरीय उपनिषदि विशेषोल्लेखो वर्तते। यथा–"**तस्माद्वा एतस्मादात्मनः आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी।**

पृथिव्या ओषधयः। ओषधिभ्योऽन्नम्। अन्नाद्रतः। रेतसः पुरुषः। स वा पुरुषोऽन्न रसमयः।।' तै. उ. प्रथमोऽनुवाके।

अर्थात् एतस्मात् आत्मनः आकाशः शब्दगुणो भूताकाशः सम्भूतः, आकाशात्—आकाशभावापन्नात्परमात्मनः वायुः। वायोः उक्तलक्षणात् अग्निः। शब्दस्पर्शरूपत्रिगुणोऽग्नि संभूतः। अग्नेः उक्तरूपात् आपः, शब्दस्पर्शरूपरसचतुर्गणानि जलानि संभूतानि। अद्भ्यः उक्तलक्षणाभ्यः पृथिवी शब्दस्पर्शरूपरसगंधपञ्चगुणवतीभूमिः सम्भूताः। पृथिव्याः उक्तरूपाया ओषधयः फलपाकांता व्रीहियवादिभ्यः सम्भूताः। ओषधीभ्यः व्रीहियवादिभ्यः अन्नं ओदनादिरूपं सम्भूतम्। अन्नाद्रतः। वीर्य्यात् पुरुषः स वै अन्नाज्जायमान पुरुषः अन्नरसविकारः।

उपर्युक्तमन्त्रेषु पर्यावरणस्याधारभूतानां पञ्चमहाभूतानाम् उत्पत्तिवर्णनं विद्यते। अनेन मन्त्रेण सिद्धो भवति, यत् पुरुषस्य उत्पत्तिकारणमेव पञ्चमहाभूतानि सन्ति। यथा तुलसीदासकृते रामचरितमानसे–

**क्षिति जल पावक गगन समीरा।**

**पंच रचित यह अधम शरीरा।।**[१]

यद्यपि उपनिषद्काले पर्यावरणम् दूषितं नासीत्। तथापि तदा सर्वे ऋषयः जागरुकारासन्। कारणञ्च ऋषिमुनयः आत्मसाक्षार्थमरण्ये वासमकुर्वन्, तत्रैवकान्त प्रशान्तवातावरणे गुरुशिष्ययोः आत्मरहस्य प्रश्नोत्तरं प्रचलतिस्म। आध्यात्मिकज्ञानार्थं शान्तैवं स्वच्छवातावरणमावश्यकमासीत्। एतादृशशान्तवातावरणस्योल्लेखः "श्वेताश्वेतरोपनिषदि" प्राप्यते। यथा–

**समे शुचौशर्करावह्निवालुका, विवर्जिते शब्दजलाश्रयादिभिः।**

**मनोऽनुकूले न तु चक्षु पीडने, गुहानिवाताश्रयणे प्रयोजयेत्।।**[२]

अर्थात् समे पवित्रे सूक्ष्मप्रस्तरादि वह्निवालुकादि रहिते, शब्दजलश्रयाद्यनुकूले नेत्रपीडारहिते वायुशन्यस्थाने परमात्मनि मनः योजयेत्। अत्र पर्यावरणे भूमिसंरक्षणम् कथमावश्यकम्? भूमिसंरक्षणम् यदा वयं कुर्मः तदैव परमात्मनि ध्यानार्थं स्वच्छवातावरणं प्राप्स्यामः। अन्यथा कदाऽपि नैवेति सूक्ष्मसंकेतो वर्तते। अन्यच्च– अस्मिन् मन्त्रे

---

१. रामचरितमानस– किष्किन्धा काण्डे ११, २. श्वेताश्वेतरोपनिषद्– २/१०

अग्निजलवनस्पतयः विवस्यान्य प्राकृत तत्त्वेषु एकैव महाचेतना विद्यमानोऽस्ति। यथा–

**यो देवो अग्नौ यो अप्सु यो विवम् भुवनमविवेश।**

**य ओषधिषु यो वनस्पतिषु तस्मै देवाय नमो नमः।। श्वेताश्वेतरोपनिषद्– २/२/१७।।**

अनेन मन्त्रेण जलस्य वनस्पतेश्च महत्वं प्रकटं भवति, जलवनस्पत्योहानिर्नस्यात् इति अस्मान् सूच्यते, कारणञ्च सर्वेषु ईश्वरीय महाचेतना वर्तते। मुण्डकोपनिषदपि स्वीकरोति। यथा–

**"अतः समुद्रा गिरयश्चसर्वेस्मात्स्यंदंते सिंधवः सर्वरूपाः। अतश्च सर्वा ओषधयोः रसश्च येनैव भूतैस्तिष्ठते ह्यंतरात्मा।।"[1]**

अर्थात् सर्वे गिरयः सागराबच प्रभवंति अस्मात् प्रकृताक्षरात्। नद्यः अनेकरूपाः स्रवंति। प्रकृताक्षरात् एव समस्ता ओषधयः व्रीहियवादिः जाताः। रसश्च मधुरादिषट्प्रकारोऽत एव जातइत्यर्थः। येन रसेन भूतैः पञ्चभिश्च पृथिव्यादि स्थूलतत्त्वैः परिवेष्टितः , एषः स्थूलशरीरे वर्तमानोऽन्तराता। सूक्ष्मदेहः तिष्ठति।

कठोपनिषदि ऋषिः शुद्धजलस्य वर्णनं कुर्वन् तस्य स्वरूपं विज्ञानसम्पन्नमुनेरन्तरात्मा सदृशं वर्णितमस्ति। यथा–

**यथोदकं शुद्धे शुद्धमासिकं तादृगेव भवति।**

**एवं मुनेर्विजानत आत्मा भवति गौतमेति।।कठोपनिषद् – २/१/१५।।**

यथा स्वच्छं जलं स्वच्छे जले आसिक्तं शुद्धजलाभिन्नमेव भवति, न तु दुर्गे पतितजलवन्नानाऽवस्था प्राप्ति द्वारा विनश्यति। मननशीलस्य आत्माऽभेदज्ञानवतः विशुद्धे मनसि स्थित आत्मा तत्पदार्थाभिन्नो भवति।

शुद्धजलस्य महत्वं प्रदर्शयन् मुनिः अत्र मनुगयाणां कृते जलं जीवनं कथयित्वा जलस्य संरक्षणम् अवश्यं कर्तव्यं कारणञ्च जलमस्माकं प्राणोऽस्ति। यथा–

**"षोडशकल! सोम्य पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्रणो न पिबतो विच्छेत्स्यतइति।"[2]**

---

१. मुण्डकोपनिषद्– २/९,

२. छान्दोग्योपनिषद्– सप्तमखण्ड– १

हे सोम्य पुरुषः यद्येतदत्रकृतं मानसं वीर्यं प्रत्यक्षीकर्तुमिच्छसि तर्हि पञ्चदशाहानि दिनानि माशीरथने मा कार्षीः। अपस्तु यथेच्छं पिब यतो उदकपानमकुर्वतस्तवप्राणोविच्छेदमापत्स्यते। यस्मादापमयोऽविकारः प्राणः। जीवने जलस्य महत्वमस्ति जलस्योपासना केनरित्याकर्तव्याऽत्र छान्दोग्योपनिषदि वर्णितमस्ति। यथा–

**" सर्वास्वप्सु पञ्चविध सामोपासीतमेघो यत्संप्लवसे स हिंकारो यद् वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स गङ्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम्।।"**

अन्यच्च–

**" इमाः सोमनद्यः पुरस्तत्प्राप्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति समुद्र एव भवन्ति ता यथा तत्र न विदुरियमहमस्मीति।।"**[१]

इमाः गंगाद्याः नद्यः पुरस्तात् पूर्वां दिशां प्रति स्रवन्ति। पश्चात् प्रतीचीं दिशं स्यन्दन्ते, ता नद्यः समुद्रादम्भोनिधेर्जलधरैराक्षिप्ताः पुनर्वृष्टिरुपेण पतिता गंगादि नदीरूपिण्यः सत्यः पुनः समुद्रैकतां गच्छन्ति। ता नद्यो तत्र समुद्रे समुद्रात्मनैकतां गता न विदुरियं गंगाहमस्मीयं सिंध्वहस्मीत्येवं तथा गता अपि न विजाननति।

- उपनिषदि वायुसंरक्षणचिन्तनम्।

ब्रह्माण्डस्य अधिकतरभागे वायुरस्ति। येनविना कोऽपि प्राणिः जीवितुं न शक्नोति। चेत् जलं प्रदूषितमस्ति तर्हि प्रदूषितजलमपित्वास्वं रक्षितुं कदाचित् शक्नुमः, परन्तु प्रदूषितो वायुः श्वास–प्रश्वासद्वारा अस्माकमन्तःकरणे गच्छति, अतः सर्वेषां प्राणिनां कृते शुद्धवायोराश्यकता अस्ति। उपनिषद्ग्रन्थे वायोः उत्पत्तिविषये उल्लेखोऽस्ति। यथा–तैत्तिरीयोपनिषदि–

**" भूरिति वै प्राणः। भुवइत्यपानः। सुवरिति व्यानः।महइत्यन्न्म्। अन्नेनवाव सर्वे प्राणा महीयन्ते। स वेद ब्रह्म। सर्वस्मै देवा बलिमावहन्ति।"** [२]

भूरित्याकारिका व्याहृतिः वै प्रसिद्धः प्राणः मुखनासिकाभ्यां पाग्गमनवान् वायुः। भुवः इत्याकारिका व्याहृतिः अपानः सर्वाग्गमनवायुः। सुव इत्याकारिका व्याहृतिः व्यानः नानाविधगतिमानवायुः। मह इत्याकारिका व्याहृतिः अन्नं व्रीहियवादिलक्षणमन्नं भुक्ते नोक्तान्नेन वाव प्रसिद्धाः सर्वेप्राणाः प्राणापानव्यानरुपाः महीयते तर्प्यन्ते वर्धन्ते एतत् प्रसिद्धम् लोके। जगत्व्यापि समज्ञतप्राणाः इमे त्रय व्याहृतयाः एव सन्ति। अखिलं जगत् यः

---

१. छान्दोग्योपनिषद – उ.द.का. १, २. तैत्तिरीयोपनिषद –उ. अनुवाक ५

सञ्चालयति तस्य परमेश्वरस्य अन्नरुपे उपासना कर्तव्या। अत्र वायोः प्रधानत्वं वर्तते। अन्यच्च– अस्मिनुपनिषदि वायुं समष्टिरुपं परब्रह्मरुपेण वर्णितवानस्ति। यथा–

**"नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि।"** (तै.उ. अनुवाक १)

ब्रह्मणे सूत्रात्मकवायवे नमः प्रह्वीभाव करोमीति। हे वायोः तुभ्यं नमस्करोमि। नमो ब्रह्मणे इत्यत्र सूत्रात्मकरुपेण वायोः परोक्षत्वात्संबोधनाभावः। नमस्ते वायो इत्यत्र प्राणवायुरूपेण वायोरपरक्षत्वात् संबोधनमिति। तदेव स्पष्टयति ऋषिः–

"त्वमेव प्राणात्मको वायुरेव साक्षिप्रत्यक्षं ब्रह्म भवसि, बृंहणहेतुत्वात् ब्रह्म प्राणकृते नाशनादिना शरीरादबृंहणस्य प्रसिद्धत्वात् प्राण एवात्र ब्रह्मरूपेणोक्त। त्वामेव प्राणातमकमेव अपरोक्ष ब्रह्मस्वरूपं वदामीति।" यद्यपि तस्मिन् उपनिषदिकाले जनसंख्याभावात् अन्यकारणात् वायुः प्रदूषितं नासीत्। तथाऽपि ऋषिः वायोः संरक्षणं स्यात्, तस्यादरपूर्वकमुपयोगःस्यात् तदर्थ वायोः महत्वं प्रकटितमस्ति। वायुः केनाऽपि प्रकारेण दूषितं न स्यात्, तस्य संरक्षणार्थं सम्यक् प्रकारेण ध्यानं ददति स्म।

- वनस्पतिसंरक्षणम्।

उपनिषद्ग्रन्थाः वृक्षेषु जीवनस्य सत्ता स्वीकुर्वन्ति स्म। छान्दोग्योपनिषदि यथा–

**"अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन् स्रवेद्योग्रेभ्याहन्याज्जीवन् स्रवेत्स एव जीवेनात्म नानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति।"**
**(छा.उ. अष्टमे ११)**

हे सोम्य अनेकशाखादि संयुक्तस्य वृक्षस्य यः कश्चिन् मूले परश्वादिनाऽभ्याहन्यात् सकृत् घातमात्रेण जीवन्नेवरसं स्रवेत्, तथा यो मध्ये घातयेत् जीवन्स्रवेद्योऽग्रेभ्याहन्याज्जीवन् सगवेदत्तः स एव वृक्षः इदानीं जीवेनात्मनाऽनुप्रभुतो व्याप्त सन् पेपीयमानो मूलैरुदकादिकं पिबन् हर्षं प्राप्नुवन् तिष्ठति। यस्य वृक्षस्य कोऽपि अंशात् जीवो जहाति स शुष्यति, एतादृशं पर्यावरणे वनस्पतिशास्त्रस्य दीर्घचीन्तनं केवलं ऋषयः कर्तुं शक्नुवन्ति। यथा–

**"अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति, द्वितीयां जहात्यथ सा शुष्यति। तृतीयांजहात्यथ सा शुष्यति। सर्वं जहाति सर्वः शुष्यति।।"**[१] (छा. उ.अष्टमे ११)

---

१. छान्दोग्योपनिषद–अष्टमे ११,

अस्य वृक्षस्य एकां शाखां जीवो जहाति शाखायां प्रसृतमात्मांशमुपसंहरत्यथ, तदा सा शाखा शुष्यति, जीवकर्म क्षयात् शरीरं परित्यज्य जीवः नूतनशरीरे प्रविशति, तथैव समानधर्मी दृष्टान्तेन ऋषिः वनस्पतिं प्रति स्वादरभावं प्रकटयति।

इतः परं बृहदारण्यकोपनिषदि तु ऋषिना एवमुल्लिखितमस्ति यथा मनुष्येषु त्वक्रक्तमज्जाअस्थीनि सन्ति, तथैव वृक्षेष्वपि। वृक्षा अपि सुखदुःखानुभवं कुर्वन्ति। यथा–

**यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।**

**तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः।।**[१]

अन्यच्च– **"त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः।तस्मात्तदातृणात् प्रैति,रसोवृक्षादिवाऽऽहतात्।।"**

**मांसान्यस्य शकराणि कीनाटं स्नाव तस्थिरम्।**

**अस्थीन्यन्तरतो दारुणि मज्जामज्जापमोकृता।।**

**यद् वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः।।(बृ.उ. अ.५)**

लोके वनस्पतिस्तथैव तत्सधर्मैव पुरुषः इत्येतत् न मृषा यथा पुरुषस्य लोमानि तत्स्थानीयानि बहिरुत्पाटिका सर्वापेक्षया बहिर्भूता नीरसा त्वक्।त्वचः सकाशादेवास्य पुरुषस्य रुधिरं निःसरति। वृक्षस्यापि त्वचः सकाशादेवोत्पटोनिर्यासः प्रस्यन्दी। एवमुक्तं साधर्म्यमनुभवेन निगमयति।यस्मात् वनस्पते पुरुषस्य च सर्वं समानं तस्मादाहताच्छिन्नाद् वृक्षात्वनस्पतेः रस इव निर्यास इवाऽऽतृणाद्धिं सितात्पुरुषात्तद्रुधिरं निर्गच्छति। किञ्च अस्य पुरुषस्य मांसानि तत्स्थानीयानि वनस्पतेः शकलानि। कीनाटं नाम वृक्षस्य शकलेभ्योऽभ्यन्तरं काष्ठसंलग्नं वल्कलरुपमुच्यते। तत्स्थानीयं पुरुषस्य स्नावास्थि संलग्नो धातुविशेषस्तदुभयं स्थिरं दृढं पुरुषस्यस्नावभ्यन्तरतोऽस्थीनि भवन्ति, तत्स्थानीयानि वृक्षस्याभ्यन्तरतो काष्ठानि। मज्जाशब्देनोभयत्रास्थिकाष्ठगतस्नेह उच्यते। स च वृक्षपुरुषयोर्मज्जैव मज्जाया उपमा कृता नान्योविशेषः, यद्यपि वृक्षो छिन्नः पुनः पुनरपि पूर्वस्मादभिनवतरःप्रादुर्भवति।

वर्तमानकाले वनदोहन कारणात् वनस्पतयः लुप्तप्रायाः जाताः। अरण्यानां न्यूनत्वात् प्रदूषणस्यवृद्धिर्जातः। वनानि, औषध–वनस्पत्यादीनां गृहाणि भवन्ति। "यथा छिन्न

---

१. बृहदारण्यकोपनिषद् –उ. अ. ५

मूलो कुतो शाखा'' अतः वनसंरक्षणात् वनस्पतीनां संरक्षणं स्वयमेव भविष्यति।

**समीक्षा–** यदि वयं वैदिकऋषीणां निर्देशस्य पालनं कुर्याम "शत हस्त समीर सहस्र हस्त संकिर'' तर्हि अद्य एतादृशं पर्यावरण प्रदूषणं न स्यात्। अस्माभिः प्रकृते र्दोहनमत्यधिकरूपेण कृतम्, परन्तु प्रकृतये किमपि न दत्तम्। स्वस्थ राष्ट्र निर्माणाय ऋषिमतानुसरणमावश्यकं पुनः ऋषिवाणीषु विचारयामः।

## (ब) १. महाकविनां पर्यावरणविषये योगदानम्।

अस्माकं संस्कृतसाहित्यं तपोवन साहित्यं वर्तते। प्राकृतिक वातावरणैव मानवीय सृष्टिः सञ्जातः। सर्वप्रथमं ऋषयः स्वपरितः व्याप्तपृकृत्याः विस्तृतसाम्राज्यं तैरपश्यन्। प्रकृत्याः क्रोडे वेदमन्त्राणां साक्षात्कारं कृतम्। वेदेषु नदी–वृक्ष–वायु–पृथिवी–अग्न्यादीनां सूक्तीनां माध्यमेन कृतं स्तुतिमस्माकं पूर्वजानां पर्यावरण सचेष्ट तायारनुपमोदाहरणमस्ति। वृक्षान् पुत्रवत् ऋषय. मन्यते स्म। यथा–

**दशकूप–समावापी दशवापी–समोह्रदः। दशह्रद–समः पुत्रो दशपुत्रसमो द्रुमः।।**[१]

वृक्षेषु ईश्वरस्य वासो भवति। स्कन्दपुराणे–

**पार्वती विल्ववृक्षस्थां लक्ष्मौ च तुलसीगताम्।**

**आदौ सर्ववृक्षमयं पूर्वंविश्वमजायत।।**[२]

महर्षिवेदव्यासः महाभारते वृक्षाणां षड् जातयः भवन्तीति कथयति। यथा–

**स्थावराण्प्र च भूतानां जातयः षट् प्रकीर्तिताः।**

**वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः।।**

**एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्वि मे।**

**कीर्तिश्च मानुषे लोके प्रेत्य चैव फलं शुभम्।।**

**अतीतानागते चोभे पितृवंशं च भारत।**

**तारयेद् वृक्षरोपि च तस्माद् वृक्षांश्चरोपयेत्।।**

**तस्यपुत्रा भवन्त्येते पादपा नात्रशंसयः।।–महाभारते।।**

काव्यशास्त्रस्याऽपि अनुशीलनेन सम्यगिदं प्रतीयते, यन्मानवीयकल्पनाया विकासे प्रकृतेर्महद् योगदानमस्ति। संस्कृतनाटकसाहित्ये भवभूतेर्मूर्धन्यस्थानं वर्तते। तेन रचितं साहित्यजगति सुप्रसिद्धम् "उत्तररामचरितम्" नाटकेऽपि पर्यावरणस्य चिन्तनं वर्तते। महाकविः मानसिकशान्तिरेवं निष्कलुषतायै अनाशक्तिभावं प्राधान्यं ददन् कथयति–

१. पद्मपुराण –५/१२,    २. स्कन्धपुराण – १५/६१

" एते हि हृदयमर्मच्छिदाः संसारभावाः। येभ्योवीभत्समानाः संत्यज्य, सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः"।–उत्तररामचरिते।।

मानसिकोद्वेगः दुःखं शोकादि विकृतीनांजनकाः तथा पर्यावरणस्य प्रदूषणकर्ता वर्तन्ते। अतः महाकविरुपदिशति यदुक्तं विकाराणां निराकरणाय प्राणिमात्राणां प्रसन्नता आवश्यकी वर्तते। तद्यथा–

**कष्टोजनः कुलधनैरनुरञ्जनीयस्तन्नोयदुक्तमशुभं न हि तत्क्षमं ते।**

**नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थिति र्नचरणैरवताडितानि।।**[१]

कविःनिर्मलजलानितसरिताः सरोवराणाञ्च वर्णनेन सह पर्यावरणस्य विशुद्धिकरणार्थ साधनभूतं सुगन्धितं वनस्यापि वर्णनं कृतमस्ति। यथा–

**त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु।**

**इतीहारमतैर्वासो स्नेहस्तस्याः स तादृशः।। उत्तर. २/१८।।**

मयूरमृगादि जीवानां सानन्दविचरणं सान्द्रवृक्षसरितानामुल्लेखेन कविः तदानीन्तनकालस्य विशुद्ध पर्यावरणस्य परिचयं ददाति। यथा–

**एते त एव गिरयोविरुवन्मयूरास्तान्येवमत्तहरिणानि वनस्थलानि।**

**आमञ्जुवञ्जुलललितानि च तान्यमूनिनीरन्ध्रनीप निचुलानि सरित्तटानि।। उत्तर. २/२३।।**

क्रौञ्चमिथुनादेकं बाणेन आहतं दृष्ट्वाऽपरपक्षीं प्रति करुणाविगलित– आदिकविः वाल्मीकेः काव्यकृतौ प्रकृतिं प्रति आत्मीयतायारभिव्यञ्जनानितान्त स्वाभाविकी वर्तते। तद्यथा–

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।** [२]

आचार्य चाणक्यस्य यद्यपि अर्थशास्त्रं राजनीतिशास्त्रञ्च प्रसिद्धे स्तः। तथापि तेन स्व ग्रन्थे पर्यावरणस्यापि चिन्तनं कृतमस्ति। वनसंरक्षणं, पशूनां संवर्द्धनविषये। यथा–

**" द्रव्य हस्ति वन व्रज निवेशयेत्। पशु मृग–द्रव्य–हस्ति–वन–परिग्रहो वनम्। गो महिषमजाविकं खरोष्ट .मश्वाश्वतराश्चव्रजः।।**[३]

१. उत्तररामचरित – १/१४, २. वाल्मीकिरामायण – बालकाण्ड २/१५, ३. अर्थशास्त्र– २/१/२२

महाकवीनां विविध दृश्य–श्रव्यकाव्ययोः नाटक–महाकाव्य– गीतिकाव्य–आख्यायिकादिषु पर्यावरणं वण्यविषरूपे स्वीकृतमस्ति। यथा अग्निपुराणे–

**" नगरार्णवशैलर्तुचन्द्रार्काश्रमपादपैः ।।"** [१]

इति कथनेनानुमीयते यदग्निपुराणे पर्यावरणीय सम्पदायाः संरक्षणं सम्बर्द्धनं च सम्यक् क्रियते स्म। अन्य महाकाव्य ग्रन्थेष्वपि ऋतु– दिवस–रात्रि–संध्या, सूर्यचन्द्रयोः उदयास्तवर्णनं तथा मानव निर्मित नगराश्रमादीनां वर्णनमपि प्राप्यते। साहित्यदर्पणे षष्ठः परिच्छेदे महाकाव्यं कीदृशं भवितव्यमिति वर्णनप्रसंगे विश्वनाथो कथयति–

**संध्यासूर्येन्दूरजनीप्रदोषध्वान्तपासराः । प्रातर्मध्याह्नेमृगयाशैलर्तुवनसागराः ।।** [२]

गद्यसाहित्यस्य सर्वश्रेष्ठगद्यकारः गद्यसम्राडित्युपाधिधारी महाकविबाणभट्टोऽपि कादम्बरी नामके निजप्रसिद्धग्रन्थे प्रकृतेः संश्लिष्टचित्रणमकरोत्। अच्छोदसरोवरस्यालौकिकाकर्षकप्रसंगम्। तद्यथा–

**"क्वचिद्वरुणहंसोपात्तकमलवनमकरन्दम्, क्वचिदिग्गजमज्जनजर्जरितजरन्मृणालदण्डम्,**
**क्वचित्त्र्यम्बकवृषभविषाणकोटिखण्डिततलशिलाखण्डम्,**
**क्वचिद्यममहिषशृंगशिखरविक्षिप्तफनपिण्डम्, क्वचिदैरावतदशनमुसलखण्डितकुमुदखण्डम् ।।"**
**काद.पू. ।।**

एवं रित्या प्रकृतिप्रेमी भवभूतिरपिदण्डकवनवर्णमत्र प्रस्तौति। यथा–

**स्निग्धश्यामाः क्वचिदपरतो भीषणभोगरुक्षाः,**
**स्थाने स्थाने मुखरककुभो झंकृतैर्निझराणाम् ।**
**एते तीर्थाश्रमगिरिसरिद्गर्तकान्तारमिश्राः**
**संदृश्यन्ते परिचितभुवो दण्डकारण्य भागाः ।।उत्तररामचरिते– २/१४ ।।**

प्रकृतिवर्णने महाकविः श्री हर्षोऽपि सिद्धहस्तः प्रथितः नैषधमहाकाव्ये प्रकृतेर्नानारूपे वर्णनं दृश्यते। दमयन्तीं स्मरन् नलोऽपि प्रमदवने एवं शान्तिं लभते।वने लनः वनपालपाणिना पुण्यफलादिभिर्निर्देशेन प्रदर्श्यमानं वनसौन्दर्यमपश्यत्। खगोड्डयनेनोद्गतेनवातेन कम्पिते पल्लवहस्ते फलानि पुष्पाणि च गृहित्व वनवृक्षैर्वृद्ध

१. अग्निपुराण –२९/३३७, २. साहित्य दर्पण –६/३३२,

महर्षिभ्यः शिक्षित्वा तेषामातिथ्य सम्पादितम्। तद्यथा–

**फलानि पुष्पाणि च पल्लवे करे। वयोऽतिपातोद्गतवातवेपिते।**

**स्थितैः समादाय महर्षिवार्धकाद्वने तदातिथ्यमशिक्षि शाखिभिः।।[1]**

अत्र नलस्य स्वागतं मानवानामिव वृक्षैः क्रियते, अतः पर्यावरणस्य मानवीकरणं वर्तते। अन्यच्च–

**नवा लता गन्धवहेन चुम्बिता, कशम्बिताङ्गी मकरन्दशीकरैः।**

**दृशा नृपेण स्मितशोभिकुड्मला, दरादराभ्यां दरकम्पिनी पपे।।[2]**

अस्मिन् श्लोके गन्धवहो नायकरूपेण चित्रितो वर्तते नायिका रूपेण लतायाः चित्रणेन पर्यावरणस्य मानवीकरणं सम्पादितम्। वश्यवाणी बाणभट्टोऽपि स्व कादम्बरी ग्रन्थे बिम्बात्मिकांप्रकृतिं नानारूपेण अचित्रयत्। कादम्बर्यां प्रकृतेः मनोहृय सुन्दरता–अवलोकनीया। मधुमासै पुष्परसैः क्वचित् धवलगुणैराधिक्येंन धरित्री धवला जाता, क्वचित् पलाशपुण्यैः सान्ध्यगुणोपेता विभाव्यते। किं बहुना उक्तेन प्रकृति वर्णने बाजः श्रेष्ठतमः ज्ञायते। उदाहरणरूपेण जाबालिर्नाममुने राश्रमवर्णनं द्रष्टव्यम्। तद्यथा–

**"परिचितशाखामृगकराकृष्टिनिष्कास्यमान प्रवेश्यमानजरदन्धतापसम्, इभलभार्धोपमुक्तपतितैः सरस्वतीभुजलताविगलितैः, शङ्खवलयैरिव मृणालशकलैः कल्माषितम्, ऋषिजनार्थमेणकैर्विषाणशिखरोत्त्रवन्यमान विविधकन्दमूलम्, अम्बुपूर्णपुव्यकरपुटैर्वकरिभिरापूर्यमाण विटपालवालकम्, ऋषिकुमारकाकृष्यमाणवनवराह द्रष्टान्तरालग्नशालूकम्, उपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणे–मुनिहोमहुताशनम् अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्।" (कादम्बरी– पूर्वार्द्धे)**

अस्मिन् गद्यांशे आश्रमकवयोवृद्धान्त ताप सं मानवा इव करैखलम्बमाना आश्रमे प्रवेशयन्तीति जन्तूनां अद्वितीयं मानवीकरणं दृश्यते। प्राचीनाचार्यकवयो निजकाव्येषु पर्याप्तमात्रायां अलंकार विधानरुपेण प्रकृति चित्रणं कृतवन्तः सन्ति। तद्यथा–माधः

**विततपृथुरत्रातुल्यरुपैर्मयूखैः कलश इव गरीयान् दिग्भिरा कृण्यमाणः।**

**कृषचपलविहंगालाप कोलाहलाभिर्जलनिधि जलमध्यादेश उत्तार्यतेकः।।शिशुपालवधे ।।**

१. नैषध महाकाव्य – १/७४, २. नैषध महाकाव्य –१/८५,

अन्यच्च– महाकाव्येषु प्रकृतिः प्रत्यक्षरुपेण यत्र तत्र भावोदीपिका चित्रिताऽस्ति। अन्यान्य महाकाव्येष्विव शिशुपालवधेऽपि प्रकृतिचित्रणमुद्दीपनरुपेण प्रचुरमात्रायां कृतं विद्यते। पलाशपुण्याणामुद्दीपकत्वं प्रकाशयन्माधकविनिर्ज महाकाव्ये कथयति–

**अरुणिताखिलशैलवना मुहुर्विदधती पथिकान् परितापितः।**

**विकचकिंशुक संहतिरुच्चकैरुदवहद्दवहव्यवहश्रियम्।।**[१]

पर्यावरणस्य संरक्षणे वातावरणस्यापि महत्वपूर्णा भूमिका वर्तते। वातावरणस्यनिर्माणे प्रकृतिघटनयोः सहजमनुरूपत्वं तिष्ठति। कविर्यादृश्याः घटनाया वर्धनं कर्तृमिच्छति अथवा चरित्रस्य यद्रूपं प्रस्तुतं कर्तुमिच्छति, तदनुरूपमेव स पार्श्वभूमेः प्रकृतौ वातावरणस्य निर्माणं करिष्यति, एतादृशेन प्रयोगेन प्रकृतिमानवजीवन योरेकः सहजः सम्बन्धः स्थापितो भवति, प्रकृतेश्चेयमवतारणाऽत्यधिकप्रभावोत्पादिका भवति। सौरवानन्दे निजप्रशस्त ग्रन्थे कविरश्वघोषेनाऽनेनैव वातावरणेन सह कपिलमुनेराश्रमस्य वर्णनं कृतवान्नस्ति। हिमालयस्य पार्श्वभूमौ विस्तृतक्षेत्रसम्पन्ना पवित्रा कपिलमुनितपोभूमिरासीद् । तद्यथा–

**पर्याप्तफलपुष्पाभिः सर्वतो वनराजिभिः। शुशुभे ववृथे चैव नरः सासधनवानिव।।**[२]

अत्र तपोभूमेः समस्तवर्णने एतादृशो शान्तेः पवित्रतायाश्च भावना वातावरणरूपेण प्रसृतास्ति।

महाकविः कालिदासः प्राकृतिक सौन्दर्याय वातावरणरूपप्रदाने सर्वाधिकः सफलोऽभूत्। राज्ञो दिलीपस्य मार्गे प्रकृतिसर्वथानुरूपवातावरणमुपस्थापयति। मनोरथसिद्धिसंकेतं ददानः पवनस्तदनुकूलः सन् तथा दिशि प्रवाहितोऽभूद्यथा धूलिकणौ न सुदक्षिणायाः केशपाशस्पृष्टं शशाक न च दिलीपस्य शिरोवेष्टनम्। यथा–

**पवनस्यानुकूलत्वात्प्रार्थनासिद्धि शंसिनः।**

**रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ।।रघु. – १/४२।।**

अपिच–

---

१. शिशुपालवध – ६/२१,        २. सौन्दरानन्द– १/५,

सरसीष्वरविन्दानां वीचिविक्षोय शीतलम्।

आमोदमुपजिघ्रन्तौ स्वनिः श्वासानुकारिणम्।।[१]

अर्थात् सरोवरेषु वीचिविक्षोभ चालितानां विकसितानां कमलपुष्पाणां गन्धं मार्गे घ्राणेन गृहन्तौ तौ दम्पति गुरोर्वशिष्ठस्याश्रमं सानन्दं जग्मतुः।

**निष्कर्षः–**

काव्यसौन्दर्य विधायकालंकाराणां मुलोत्पादनकारणं प्रकृतिरेव वर्तते। अलंकारसंयोजनसमये प्राकृतिकयथार्थस्य निर्वाहः, प्रकृतेः सूक्ष्मनिरीक्षणं, पर्यावरणस्य बहुमुखी ज्ञानेन सम्भवोऽस्ति। प्रकृतेः प्रत्येकपक्षानां सूक्ष्मातिसूक्ष्म निरीक्षणं निरुपणञ्च कुर्वन्– अलंकार योजनाकारको गद्यकविः बाणभट्टः प्रकृतेः स्वाभाविकतायाः नैसर्गिक प्रस्तूतिकरणे प्रसिद्धो भवभूतिः प्रकृति चमत्कारपूर्णाऽलंकारैरतिशय मण्डने प्रथिताः माध–मास–हर्षादिभिः सर्वे कवयः स्व–स्व ग्रन्थेषु पर्यावरणस्य वर्णनं कृतमस्ति।

काव्यशास्त्रे विचक्षणाः सर्वेकवयः प्रकृतिचित्रणेस्व – स्वस्थाने महत्वं धारयन्ति। परन्तु कालिदासः प्रकृतेः सौम्यरूपे, माधूर्यमयप्रवृतौ, स्निग्धसौन्दर्यतया, मानवप्रकृत्योरेकात्मकभावेन वर्णनतया समाकृष्ट संलक्ष्यते। अतः महाकविः कालिदासः निःसन्दिग्धं पर्यावरणं(प्रकृतिम्) यथार्थरूपप्रदाने सर्वाधिकः सफलोऽभूत्।

---

१. रघुवंश – १/४३

## २. कालिदासस्य पर्यावरण समीक्षा।

पर्यावरण–विज्ञानं जीवपर्यावरणस्य–अन्तसम्बन्धानां विज्ञानमस्ति। मानव–पर्यावरणविज्ञानस्य दृष्टौ मानव–पर्यावरयोरन्तः सम्बन्धानामध्ययनमावश्यकमस्ति। कविः मानवीय दृष्टिकोणतोऽपि पर्यावरणस्य निरूपणं करोति। तस्य काव्यगतवर्णने मानवः तथा तस्य परिवेशस्य पारस्परिक–सम्बन्धानां चित्रणं स्वाभाविकं दृश्यते। कालिदासानुसारेण प्राकृतिकपर्यावरणं मानवयोर्मध्ये प्रत्यक्ष अन्तःक्रियानां प्रमुखस्थानीमानि सन्ति।

(१) वनम् –

वनं विविधवनस्पतीनां जीव–जन्तूनां तथा वनेचर किरातादि मानवानां वासस्थानं भवति। यत्र वन्य जीवनं नितान्तप्राकृतिकाऽवस्थयां भवति। अरण्यैः सह मानवस्य साक्षात्सम्पर्कः विहारस्थल्यां भवति। तद्यथा कुमारसम्भवे– अष्टमसर्गे पार्वत्या सह विहरन् शङ्करः गन्धमादनवनं समागच्छति। यथा–

**इत्यभौममनुभूय शङ्करः पार्थिवं च वनितासखः सुखम्।**

**लोहितायति कदाचिदातपे गन्धमादनवनं व्यगाहत।।** [१]

मृगयास्थलीरूपेण मानवानां वनेन सह साक्षात्सम्पर्कः– रघुवंशे–नवमसर्गे–

**अथ यथासुखमार्तवमुत्सवं समनुभूय विलासवतीसखः।**

**नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसन्निभः।।** [२]

अभिज्ञानशाकुन्तले मृगयार्थं सशरचापहस्तो राजा दुष्यन्तः सूतेन सह रथारूढो मृगमनुधावति। रथमवलोक्य भयभीतो मृगः शरपनभयात् भूयो भूयो रथं पश्यन् धावति। तद्यथा– **ग्रीवाभङ्गाभिरामंमुहुरनुपतति स्यन्दने दत्तदृष्टिः**

**पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।**

**दर्भैरधालीढैः श्रमविवृत–मुखभ्रंशिभि कीर्णवर्त्मा**

**पश्यांदग्रप्लुतत्वा द्विवति बहुतरं स्तोकमुर्व्यां प्रयाति।।** [३]

---

१. कुमारसम्भव –८/४८, २. रघुवंश –९/४८, ३. अभिज्ञानशाकुन्तल – १/१

अस्मिन् श्लोके ग्रीवाभङ्गपूर्वकं रथं वारं वारमवलोकयतोमृगस्य वर्णनं नितरां मनोग्राही वर्तते। महाकविना कृतं मृगधावनसम्बन्धी नैसर्गिक वर्णनमतीव चारुतमं वर्तते। अभिज्ञानशाकुन्तलस्य प्रारम्भो हि मानवस्य प्रकृतेः मृगस्यदर्शनात् भवति मुख्यतया। यात्रामार्गाणांरूपे वनैः सहोऽस्माकं सम्पर्कः रघुवंशे भवति। मानवप्रभावेण रहितवृक्षाणां नैसर्गिक सौन्दर्य वर्णनं कविना ऋतुसंहारे कृतमस्ति। यो साहित्यरसपिपासुजनानां चित्तामाकर्षति। तद्यथा– ऋतुसंहारे–

**कदम्बसर्जार्जुन केतकीवनं विकम्पयंस्तत्कुसुमाधिवासितः।**

**ससीकराम्भोधरसङ्गशीतलः समीरणः कंन करोति सोत्सुकम्।।**[१]

(२) प्रमदवनम् –

नगरपरितन्त्रस्यकृत्रिमपरिवेशे प्राकृतिक पर्यावरणेन सह सम्पर्कस्थलानि–उपवनानि एव भवन्ति। राजप्रासादे अन्तः पुरेणसम्बद्धम्, क्रीडाशैलम्, समुद्रगृहम्, वापिका, लतामण्डपम्, शिल्लपट्टकादिभिर्सुसज्जितानि प्रमदवनानि मानवनिर्मित परितन्त्राणांमुदाहरणानि – अनेकानि सन्ति। यत्र वनस्पतयः, जीव–जन्तवाश्च मानवनियन्त्रणे वसन्ति। तद्यथा– विक्रमोर्वशीयं नाटकस्य द्वितीयोऽङ्के विदुषकः–

**"भो वयस्य किमेतत्पवनशामि प्रमदवनसमीपगत क्रीडापर्वतपयन्ते दृश्यते।"(विक्रम. २ अङ्के)**

अभिज्ञानशाकुन्तलस्यषष्ठोऽङ्के राजा शकुन्तला विरहपीडितः, मनोविनोद दापक स्थलं विषये विदूषकं पृच्छति तदा विदुषक वदति–

**"एष मणिशिलापट्टकसनाथो माधवीमण्डप उपहार रमणीयतया निःसंशयं स्वागतेनैव नौ प्रतीच्छति। तत्प्रविश्य निषिदतु भवान्।"** [२]

एतत् –अभिज्ञानशाकुन्तले मानवनिर्मित परितन्त्रस्योदाहरणं वर्तते।

(३) तपोवनम् –

सघनवनानां मध्येस्थित तपोवनानि नाम प्रकृतेः नैसर्गिक साहचर्य स्थलानि न्ति, यत्र मानवः स्वार्थपूत्यर्थं नैव अपितु निस्वार्थभावनाया पर्यावरणसंरक्षणं करोति। तद्यथा–

---

१. ऋतुसंहार –२/१७, २. अभिज्ञानशाकुन्तल –६/पृ. ३१२

अभिज्ञानशाकुन्तलस्य प्रथमोऽङ्के वैरवानसः राजानं कुलपति– कण्वस्याश्रमविषये कथयति– "राजन् समिदाहरणाय प्रस्थिता वयम्। एषः खलु कण्वस्यकुलपतेरनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकायातिपातः प्रविश्य प्रतिगृहयतामातिथेयः सत्कारः।" (अभि. १/पृ. २२)

तपोवनं नाम सर्वेषां जानानां गृहमिव भवति तत्र पक्षपातः उच्चनीचस्य भावना नैव भवति, तत्र पशु–पक्षी–अतिथि–वृक्षादि सर्वेषां प्राणी मात्राणां संरक्षणं संवर्द्धनं मुक्तवातावरणे भवति स्वार्थभावना लेशमात्राऽपि न भवति कण्वाश्रमस्य दृश्यमस्मिश्लोके –

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला

भिन्नरागः किसलयरुचामाज्यधूमोद्गमेन।

एते चार्वागुपवनभुविच्छिन्नं दर्भाङ्कुशयां

नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरयन्ति।।अभि. १/१५।।

आश्रमसीमायां परिरक्षित मृगाः सर्वत्र निःशंकभावेन विचरन्ति। मेघदूते–

"स्निग्धच्छायातरुषु वसतिं रामगिर्याप्रामेषु।।[1]

कुमारसम्भवे– गौरीशिखरो नाम्ना प्रसिद्धोऽयं शिखरः। अत्र तपोवने पार्वती तपश्चकार। तद्यथा–

प्रजासु पश्चात्प्रथितं तदाख्याया जगाम गौरीशिखरं शिखण्डिमत्।। कुमार.५/७।।

अन्यच्च– कृताभिषेकां हुतजातवेदसंत्वगुत्तरासङ्गवतीमधीतिनीम्।

दिदृक्षवस्तामृषयोऽभ्युपागममन्नधर्मवृद्धेषु वयः समीक्षते।।[2]

रघुवंशे– राजादिलीपः राज्यभारः सचिवान् समर्प्यसन्तानहेतो समुचिताऽनुष्ठानार्थं सुदक्षिणादिलीपौ गुरुवशिष्ठाश्रमं जग्मतुः। तद्यथा–

अथाभ्यर्च्य विधातारां प्रयतौ पुत्रकाम्यया।

तौ दम्पती बशिष्ठस्य गुरोर्जग्मतुराश्रमम्।।१/३५।।

---

१. मेघदूत –पूर्वमेघ १, २. कुमारसम्भव – ५/७,

अगरस्त्यमुनेराश्रम वर्णनं त्रयोदशसर्गे–

भ्रूमेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नदुषं चकार।

तस्माविलाम्भः परिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम्।।रघु.३/३६।।

चतुर्दशसर्गे गर्भावस्थायां सीता तपोवनेगन्तमभिललाष–

सादष्टनीवारब लीनि हिंस्रैः सम्बद्धबैखानस कन्यकानि।

इयेष भूयः कुशवन्ती गन्तुं भागीरथीतीर तपोवनानि।।[१]

## (४) कालिदासदृष्टौ भौतिकजीवने पर्यावरणस्य महत्वम्।

मानवः भौतिकसंसाधनार्थं पर्यावरणे निर्भरोऽस्ति। नागरसभ्यता चेत् स्यात्, वा तपोवनसंस्कृतिः, साधारण मनुष्यः स्यात्, अथवा साक्षात् दिव्यपात्रं कालिदासः भोजन आवास वस्त्र श्रृङ्गार औषधीत्यादीनाऽकृत मानवान् पर्यावरणोपरि निर्झरतायाः संकेतः कृत्वा मानवपर्यावरणसम्बन्धस्य व्यावहारिकराधारः प्रस्तूतवान्नस्ति। तपस्विनः प्रकृत्यासाकं पर्णकुटौ निवसन्ति। तद्यथा–

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः।अपत्यैरिव नीवारभागधेयोचितैर्मृगैः।। रघु.१/५०।।

आश्रमवासिनः हिमालये प्रमथादिगणाश्च तत्र सुलभानि वस्तूनि सेवन्ते। यथा कुमारसम्भवे–

गणा नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शःवतीर्दधनाः।

मनः शिलाविच्छुरिता निषेदुःशैलेयनद्धेषु शिलातलेषु।।[२]

अरण्यात् कुशसमिधादीनामाहरणं कुर्वन्ति–अभिज्ञानशाकुन्तले–

"समिदाहरणाय प्रस्थिता वयम्।।"[३]

यत्राश्रमे मुनिकुमारिका ह्रस्ववृक्षमूलसेचनं कुर्वन्ति, पक्षिणस्तत्रत्यं जलं पिबन्ति। तद्यथा–

सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्।

विश्वासाय विहङ्गनामालवालाम्बुपायिनाम्।।रघु.१/५१।।

---

१. रघुवंश –१४/२८, २. कुमारसम्भव –१/५५, ३. अभिज्ञानशाकुन्तल – १/पृ. २२

स्वकालप्राप्त पुष्पं फलं च आश्रमवासिनः स्वीकुर्वन्ति– वाल्मीकिऋषिः स्वयं वदति–रघुवंशे–

**पुष्पं फलं चार्तवमाहरन्त्यो बीज च बालेयमकुष्टरोहि।**

**विनोदयिष्यन्ति नवाभिषङ्गमुदारवाचो मुनिकन्यकास्त्वाम्।। रघु. १४/७७।।**

वृक्षादाभरणार्थं पत्र पुष्पाणि मुनिकन्यकाः स्वीकुर्वन्ति तद्यथा– अभिज्ञानशाकुन्तले–

**कृतं न कर्णापितबन्धनं सखे शिरीष मागण्डविलम्बिकेसरम्।**

**न वाशरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे।।अभि– ६/१८।।**

एवं प्रकारेण सम्पूर्णजीवनचर्या पूर्णतया पर्यावरणालम्बी वर्तते। सुसंस्कृत नागरिकोऽपि भौतिक सुखधानानि पर्यावरणतरेव प्राप्नुवन्ति। कष्टप्रद ग्रीष्मर्तु सुखपूर्वकमपनेतुं जलयन्त्रमन्दिरं निर्मान्ति। तद्यथा ऋतुसंहारे–

**निशाः शशांकक्षतनीलराजयः क्वचि द्विचित्रं जलयन्त्रमन्दिरम्।**

**मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम्।।**[१]

शीतलजलं, चन्दनलेपनं, शुभ्राभूषण तनुवस्त्रादि तापहरणे सहायकाः भवन्ति। शिशिरर्तौ तुषाराधातात् संरक्षितम् आनन्दो पभोगाय सगवाक्ष भवननिर्माणं कारयन्ति। ऋतुसंहारे–

**निरुद्धवातायनमन्दिरोदरं हुताशनो भानुमतो गभस्तयः।**

**गुरुणिवासांस्यबलाः सयौवनाः प्रयान्ति कालेऽत्रजनस्यसेव्यताम्।।५/२।।**

धूपाग्निवस्त्र, व्यजनं मृत्तिका पाषाड काष्ठ खाद्यपदार्थानां मुख्यस्त्रोतः पर्यावरणं वर्तते। वसन्तोपयोगी कर्णिकार कुरबक अशोक नवमालिकादि पुष्पाभरणानि पर्यावरणप्रदत्तानि सन्ति।गजमुक्ता सिंह मृगादीन्, अन्विष्यन्निवसतानां गुहा गृहवासी वनेचराणां वनैवाऽश्रयस्थानमस्ति। कुमारसम्भवे–

**भागीरथीनिर्झरसीकराणां वोढामुहुः कम्पितदेवदारुः।**

**यन्दापुरन्विष्टमृगैः किरातैरासेण्यते भिन्न शिखण्डी बर्हः।।१/१५।।**

---

१. ऋतुसंहार – १/२,

हिमालयवासीनां दिव्यजात्योत्पन्नानां किन्नर दम्पतीना पर्वतीय गुहैव विहारस्थली वर्तन्ते। कुमारसम्भवे–

**यत्रांऽशुकाक्षेपवि लज्जितानां यदृच्छया किंपुरुषाऽङ्गनानाम्।**

**दरीगृहद्वार बिलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति।।१/१४।।**

विद्याधरस्त्रियः मदनलेखे भोजपत्रं धातुनिर्मित लेखन द्रवस्योपयोगं कुर्वन्ति। तद्यथा–

**न्यस्ताक्षरा धातुरसेन यत्र, भूर्गत्वचः कुञ्जरबिन्दुशोणाः।**

**प्रजन्ति विद्याधरसुन्दरीणामनङ्गलेखक्रिययोपयोगम्।।**[१]

कामदेवस्यामोधशस्त्राणि यथा विसतन्तु निर्मित धनुष प्रत्यञ्चा कोमलपुष्पनिर्मित धनुषः, आम्रमञ्जरीनिर्मित पुण्य बाणः पर्यावरणः (वनस्पतिभिः) प्रदत्तनि सन्ति। तद्यथा कुमारसम्भवे–

**सद्यः प्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे।**

**निवेशयामास मधु द्विरेफान् नामाक्षराणीव मनोभवस्य।।३/२७।।**

अन्यच्च–

**बिसतन्तुगुणस्य कारितं धनुषः पेलवपुण्यपत्रिणः।।**[२]

**(५) कालिदासदृष्टौ मानव–पर्यावरणयोः संवेदनात्मकसम्बन्धः।**

भौतिक आवश्यकतानां पूर्त्यर्थं पर्यावरणम्, मानवं संवेदनात्मकरुपेणाऽपि प्रभावयति। तेनकारणेन ग्रीष्मर्तौ मानवाः "शान्तमन्मथ" भवति। यथा ऋतुसंहारे–

**दिनान्तरेभ्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये।।१/१।।**

हेमन्त शिशिरौ प्रकामक्रामौ उद्बोधयतः।

**प्रकामकामं प्रमदाजनप्रियं वरोरु कालं शिशिराहयंश्रुणु।।ऋतु.५/१।।**

मानवः प्राकृतिकसौन्दर्यात् निरपेक्षो भूत्वा स्थातुं न शक्नोति। सः प्रकृतेरनुपम

---

१. कुमारसम्भव – १/७, २. कुमारसम्भव –४/२९,

चारूतां दृष्ट्वा मुदितो भवति। तद्यथा–

**तृणोत्करैरुद्गतकोमलांकुरै विचित्र नीलैर्हरिणीमुखक्षतै।**

**वनानि वैन्ध्यानि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः।।[१]**

अर्थात् साम्प्रतं शण्येषु कोमलांकुराः प्रस्फुटिताः सन्ति। हरिणीनां मुखेन खण्डिताः अपि शण्याणां पुनरुद्गतपल्लवाः करितवर्णाः सन्तः विन्ध्यवन विद्यमानाः पश्यतां जनानां मनांसि हठादाकर्षयन्ति।।

अत्र कविः शरदृतोः सौन्दर्य वर्णयन् कथयति शालयः सर्वत्र पक्वतां गताः सन्ति। तैः सम्पूर्णा मही आच्छन्ना वर्तते। सर्वत्र पक्वाः शालयः एवावलोक्यन्त। भूमौ सर्वत्र सुखपूर्वकमुपविष्टाः गावः एव शोभन्ते । एतादृशी प्रकृतिशोभां दृष्ट्वा प्रकृतिप्रेमीजनानां मनांसि प्रमुदिताः भवन्ति। तद्यथा–

**सम्पन्नशालिनिचयावृतभूतलानि स्वस्थस्थितप्रचुरगोकुलशोभितानि।**

**हंसै ससार स कुलैः प्रतिनादितानि सीमान्तराणि जनयन्ति नृणां प्रमोदम्।।[२]**

मानवं प्रति प्रकृतेः संवेदना अतिसुक्ष्मरुपेण अभिव्यक्तो भवति। उर्वश्याः विरहेण व्यथितः पुरुरवसोः मनोविनोदार्थं वसन्तकालीन मलया निलः प्रमदवनस्य अतिथिभूत पुरुरवसं विनम्रभावेन अभ्यर्थति–

"विदुषकः वदति– **"एष प्रमदवनपरिसरः। आनम्य प्रत्युपगतो भगवान् आगन्तुको दक्षिणमारुतेन।।" विक्रम.२/पृ.१२.(कालिदास ग्रन्थावली)**

तत्रैव विदूषकः मणिशिलापट्टसमीपं गत्वा वदति–

**"भोः एष खलु खलु मणिशिलापट्टकसनाथोऽतिमुक्तलता मण्डपो भ्रमरसङ्घट्टपतितैः कुसुमैःस्वयमिव कृतोपचारो भवन्तं प्रतीढदतीति।"(विक्रम.२/पृ.२/२ कालिदास ग्रन्थावली)**

अत्र अतिमुक्तलतामण्डपे भ्रमरैः पातितानि पुण्यापि पुरुरवसः स्वागतार्थं भूमौ प्रसरतानि सन्तीति, एषोच्च भावना वर्तते।गन्धमादने कल्पतरुकिसतयानां वायुसंचालानंनृत्यं, भ्रमराणांगुञ्जनगीतं, कोकिलानां कूजनमेववाद्यम् उपयुक्तैः वाधसामग्रिभिः सम्पूर्ण वनरचली रिनन्नमनापुनरवसं प्रसन्नयितुं प्रयतते। तद्यथा–

१. ऋतुसंहार –२/८, २. – ३/१६

गन्धोन्मादितमधुकरगीतैः वाधमानैः परमृत तूर्यैः।

प्रसृतपक्नो द्वेलितपल्लवनिकरः, सुललितविविधप्रकारं नृत्यतिकल्पतरुः।।विक्रम.४/१२।।

रघुवंशस्य द्वितीय सर्गे तेजस्वी राजा दिलीपस्य प्रकृतिः राजोचि सत्कारं करोति–

विसृष्ट पार्खानुचरस्य तस्य पार्श्व द्रुमाः पाशभृता समस्य।

उदीयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः।।रघु.२/९।।

मरुत्प्रयुक्ताश्च्मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।

अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्या।।रघु.२/१०।।

निष्कर्षः–

उपर्युक्तेन पर्यालोचनेन ज्ञायते यत् पृथिव्यां निवसतानां जीवनं पर्यावरणं विना नास्ति शक्यम्। पर्यावरणेन सह अष्माकं सम्बन्धः भावात्मको वर्तते। मानव पर्यावरणयोर्नैसगिक सम्बन्ध विषये वर्णनं महाकविः ग्रन्थेषु सर्वत्र दरीदृश्यते। एतादृशं मानव पर्यावरणयोर्नैसर्गिक चित्रणमन्यत्र दुर्लभोऽस्तीति।।

## ३. मानवजीवनेऽस्य प्रभावः।

पर्यावरणविज्ञानं जीपर्यावरणोरन्तः सम्बन्धानां विज्ञानमस्ति। मानव–पर्यावरण–विज्ञानदृष्ट्या, मानवे पर्यावरणस्य प्रभावविषयेऽध्ययनमावश्यकमस्ति। कविः मानवीय दृष्टिकोणतः परिवेशस्यनिरीक्षण–निझरूयणञ्च करोति। प्रस्तुतः प्रसङ्गे पर्यावरणेनाऽस्माकमाशयः कोऽपि भौगोलिकसीमाबद्ध परिवेशेन नास्ति, अपितु सम्पूर्णजगदेव पर्यावरणरूपे–अभिप्रतोऽस्ति।

प्राचीनकालादेव मानवजीवने–अस्य प्रभावः आसीत्। अधुनाऽपि मानवमात्रं भौतिकसंसाधनार्थं पर्यावरणोपरि निर्झरोऽस्ति। नागरसभ्यता स्यात् वा तपोवनसंस्कृतिः साधारण मनुष्यः स्यात् वा दिव्यपात्रं कालिदासेनाऽपि भोजन–आवास–वस्त्र–शृङ्गार–औषध्यादीनां कृते मानवस्य पर्यावरणोपरि निर्भरताया संकेतेन सह मानव–पर्यावरणयोः व्यावहारिकधारः स्वग्रन्थे प्रस्तुतवानस्ति। तपोवने निवसताः तपस्विनः वृक्ष–वल्कलं वस्त्ररूपे धारयन्ति। तद्यथा– कुमारसम्भवे–

**गणाः नमेरुप्रसवावतंसा भूर्जत्वचः स्पर्शवतीर्दधानाः।**
**मनः शिलाविच्छुरिता निषेदुः शैलेयनद्धेषु शिलातलेषु।।[१]**

आश्रमवासिनः अरण्यात् कुश–समिधादयः स्वीकुर्वन्ति। रघुवंशे–

**वनान्तरादुपपावृत्तैः समित्कुशफलाहरैः।**

**पूर्यमाणमदृश्यामग्नि प्रत्युद्यातैस्तपस्विभिः।।रघु. १/४९।।**

अन्यच्च–**पुष्पं फलं चार्तवमाहरन्तयो बीजं च बालेयमकृष्टरोहि।**

**विनोदयिष्यन्ति नवाभिषङ्गामुदारवाचो मुनिकन्यकास्त्वाम्।।[२]**

अतः कथयितुं शक्यते यत् समस्त जीवनचर्या पर्यावरणे आश्रिता वर्तते। सुसंस्कृतमानवसमाजस्य भौतिकसाधनान्यपि पर्यावरण प्राप्यन्ते। कालिदासेन 'ऋतुसंहारे' कष्टप्रदग्रीष्मर्तुं यापयितुं जलयन्त्रमन्दिरस्य वर्णनं कृतमस्ति। तद्यथा–

**निशाः शशाङ्कमनीलराजयः क्वचिद्विचित्रं जलयन्त्रमन्दिरम्।**
**मणिप्रकाराः सरसं च चन्दनं शुचौ प्रिये यान्ति जनस्य सेव्यताम्।।[३]**

१.कुमारसम्भव – १/५५, २. रघुवंश – १४/७७, ३. ऋतुसंहार –१/२

मानव–पर्यावरणयोर्मध्ये भौतिकनिर्भरता, भावात्मकाऽन्योन्यता, तादात्म्य परस्परोपकारभावना पर्यावरणम्प्रति मानवस्य निष्णपूर्णभावना–अस्वाभाविको नास्ति। अस्माकं पूर्वजाः जानन्ति स्म यदि वयं पर्यावरणस्य दोहनं स्वच्छन्दतया–अविचार्यकरिष्यामस्तर्हि पर्यावरणस्य अस्माकं प्रति कुप्रभावो भविष्यति। अतः तपोवनसंस्कृतौ मानवः स्वं पर्यावरणस्याऽनुकूलं कृत्वा–आवश्यकता पूत्यर्थमेव प्रकृतेर्दोहनं करोति स्म। अस्मिन् सम्बन्धे प्रकृतेः प्रधानता भवति, मानवस्य पर्यावरणोपरि प्रभावः नैव भवति, मूलतोऽयं सम्बन्धः वैदिककालादागतः तपोवनसंस्कृतेः योगदानमस्ति। यथा–पार्वत्या शिवसाधना, दिलीपस्य गौ सेवादि। पर्यावरणस्य असीमित–उपभोगेन मानवजीवने कुप्रभावः समागच्छति। रघुवंशे–अग्निवर्णः पर्यावरणं केवलं भोग्यं रूपेण स्वीकरोति, तेन तस्य क्षयो भवति। कुमारसम्भवे ब्रह्मणः कृपया वरं प्राप्य यज्ञविध्वंसादि प्रकृति विरुद्ध कार्यं करोति तस्य नाशो भवति। अतः कालिदासः तपोवनसंस्कृतेः समर्थकोऽस्ति।

वयं सर्वे जानीमः यदस्माकं दैनिक जीवनस्यानेक क्रियाकलापेषु पर्यावरणस्य प्रभावो वर्तते। कारणञ्च प्रातरुत्थाय रात्रौ शयनपर्यन्तं वयं यत्किमपि कार्यं कुर्मः तानि सर्वाणि कार्याणि – अधिकांशतया – पर्यावरणेन सह सम्बद्धानि – आश्रितानि च भवन्ति।

दिङ्गमात्रोदाहरण यथा –

**(१) अस्माकं जीवने वायोः प्रभावः।**

- श्वसनहेतुः – जीवनरक्षायै प्रथमं प्राणवायोः आवश्यकता भवति।
- **ज्वलन हेतु – वायोः – अनुपस्थितौ ज्वलनशीलता संभवो नास्ति। अग्नेः प्रज्वलं विना वयं भोजनादि निर्माणं कथं करिष्यामि?**
- **सञ्चारणार्थम् – वायोस्भावे वयं वक्तुं नैव शक्नुमः। यतः वायोः वाणीं सञ्चारयतीति।**
- **परिवहनम् – भौतिकयुगे शीघ्रगमनाऽऽगमनार्थं – वायुयानम्, हैलिकॉप्टर, – आदीनां परिवहनस्य मध्यमं वायुः वर्तते।**
- **वायुना पादपान् 'कार्बन– डाई–ऑक्साइड' उपलब्धो भवति।**
- **नाइट्रोजन वायुः वृद्ध्यर्थं सहायको भवति। अस्माकं जीवने वायोः प्रभावः नित्यः वर्तते।**

(२) जीवने जलस्य प्रभावः।

- यदा तृषा बाधते तदा पानार्थं जलस्य – आवश्यकता भवति।
- भोजनादि पाचनार्थं जलस्य – आवश्यकता भवति।

- शरीरे पाचनक्रिया जलं विना नैव भवितुं शक्नोति।
- स्वच्छतायै तथा वस्त्रादि प्रक्षालनार्थं जलस्य – आवश्यकता भवति।
- भवननिर्माणार्थं, वृक्षपादपानां विकासार्थं, यन्त्रागारेनिर्माणात्मककार्यार्थम्, विद्युतनिर्माणार्थं, नौचालन – तरणादि – मनोरञ्जनात्मकक्रीडार्थं, मत्स्योद्योगाय, तथाऽन्य दैनिक गतिविधिनां संचालनार्थं चले आश्रिताः वयं स्म।

सम्प्रति अनन्तरराष्ट्रीय समस्यासु जलसमस्या अतीवगम्भीरास्ति सम्भाव्यते कालान्तरे जलाभावे प्रकृतिः नष्टाभविष्यति। अत एव विचारणीय एष – प्रश्न। अस्माकं ऋषयः शुद्धजलार्थं गम्भीरतया विचारित वन्तः। ऋग्वेदे विविधेषुमन्त्रेषु सूक्तेषु च आपः चिन्तनं दृष्टिपथमायाति।

## (३) जीवने वृक्षस्य प्रभावः।

- प्रदूषणं दूरीकृत्य प्राणवायुः प्राप्त्यर्थं वृक्षस्यावश्यकता भवति। वयं वृक्षैः शुद्धिकृतप्राणवायु जीवनरक्षार्थं स्वीकुर्मः।
- भोजनसम्पादने, कागदिनिर्माणे, वस्त्रनिर्माणे, औषधीनिर्माणे, भवननिर्माणे, वर्षाहेत्वर्थं, भूमिसंरक्षणार्थं, जलसंरक्षणार्थं वृक्षसय सम्पूर्णयोगदानं भवति।

मनुष्याणां बहूनि कार्याणि वनै–र्वृक्षैश्च निष्पन्नानि भवन्ति। अतः तेषा रक्षा–वृद्धये चास्माकं दायित्वं वर्तते। वेदे वृक्षस्य कल्पना – अस्य संसारस्य मूलकारणे अन्तर्निहितोऽस्ति कथयित्वा विश्वे तस्य महिमा उपयोगिता स्पष्टं कृतमस्ति।

मनुष्य स्वजीवनस्य – आवश्यकतानां पूर्तिः पर्यावरणैः भवति। दैनिकजीवनस्य आवश्यकतापूर्ति तः जीवनस्य विभिन्नविकासात्मक कार्येभ्यः मनुष्यस्य पर्यावरणे निर्भरतायां सत्यपि पर्यावरणम्प्रति तस्योदासीनत्वमधुना चिन्तायाः विषयोऽस्ति। अत्रं प्रदत्तं तुलनात्मकाभ्यां द्वाभ्यां चित्राभ्यां माध्यमेन ज्ञातुं शक्यते यत् प्राचीनकाले मानवस्य पर्यावरणम्प्रति कीदृशानि – उच्चविचराणि सन्ति।

**निष्कर्षः**– अधुनाऽपि यदिवयं स्व–अत्याधुनिक जीवनशैलीं परिवर्त्य प्राचीन संस्कृतिं न स्वीकरोष्यामस्तर्हि अद्य यत् 'ग्लोबल वर्मिङ्ग' नामाख्यं प्रदूषणसंकटमापतीतं वर्तते, तदहर्निश वर्धिष्यते। अतो वयमस्माकं पूर्वजैः प्रदिष्टं संयमितजीवनशैलीं चेत् स्वीकरिष्यामस्तर्हि, अधुनापि पर्यावरणं प्रदूषणनिर्मुक्तं कर्तुं शक्ष्यामः।